# ॥ चतुर्थः सर्गः ॥

अथ नलस्य गुणं गुणमात्मभूः सुरभि तस्य यशः कुसुमं धनुः ।
श्रुतिपथोपगतं सुमनस्तया तमिषुमाशु विधाय जिगाय ताम् ॥१॥

इदानीं दमयन्त्या वियोगदशां विवर्णयिषुराह । अथानन्तरमात्मभूः कामस्तां भैमीमाशु त्वरितमेव जिगाय वशमनयत् । किं कृत्वा? तस्य नलस्य गुणं शौर्यादिकमेव गुणं विधाय शिञ्जिनीं परिकल्प्य । किञ्च । तस्यैव सुरभिं घ्राणतर्पणगन्धं, तत्त्वतस्तु लक्षणया प्रमोदजनकं, यश एव शुक्लत्वात् कुसुमं पुष्पं धनुश्चापं विधाय । अन्यच्च तमेव नलमिषुं बाणं विधायेति दीपकम् । कीदृशम्? तं श्रुतिपथोपगतं कर्णसमीपं प्राप्तम् । तत्त्वतस्तु श्रुतम् । कया? सुमनस्तया सुमनस्त्वेन । कामस्य हि इषुः सुमनस्त्वेन विशिष्टमाकृष्टः सन् कर्णाभ्यर्णमुपगच्छति । अथवा इषुत्वकरणे सुमनस्ता हेतुः । कामस्य खल्विषुरपि सौमनसो युक्तः । तत्त्वतस्तु शोभनं मनो यस्यासौ सुमनाः । दमयन्त्यामेव प्रेमरसार्द्रचित्तस्तस्य भावः सुमनस्ता, तया विशिष्टं हंसमुखाच्छ्रुतमित्यर्थः । सुमनस्ता देवत्वं वा । स नलः साक्षात् कश्चन देव एव दिवः क्षिताववतीर्णोऽस्तीति । धनुःप्रभृतीनामत्र क्रमो नास्ति विवक्षितः गुणादिश्रवणक्रमश्च यथा कथञ्चित् सङ्गमनीयः । आशु जिगायेति व्याख्या । आशु विधायेति वा धनुरादिसामग्र्या अनायासेनैवैकत्र घटनात् । धनुरादिभिश्चात्मभुवः एव सम्बन्धः ॥१॥

यदतनुज्वरभाक्तनुते स्म सा प्रियकथासरसीरसमज्जनम् ।
सपदि तस्य चिरान्तरतापिनी परिणतिर्विषमा समपद्यत ॥२॥

सा भैमी अननोरनङ्गस्य योऽसौ ज्वरः सन्तापस्तं भजत्येवंरूपा सती यत् किमपि स, यस्माद्धेतोर्वा प्रियस्य कथा, नलस्य प्रबन्धकल्पना, सैव सरसी महत् सरस्तस्य रसस्तत्र यन्मज्जनं ब्रुडनमन्तःसञ्चरणं तनुते स्म चकार। तस्य प्रियकथासरसीरसमज्जनस्य परिणतिरन्त्यावस्था विषमा दुःखप्रदा समपद्यत सम्पन्ना। यतः कीदृशी परिणतिः? सपदि तत्क्षणमेव चिरं बहु--कालं स्थिरीभूयान्तरं हृदयं तापयतीत्येवंशीला। मन्मथशरप्रहारव्यथितदेहा सती हंसमुखात् सादरं यन्नलगुणग्राममाकर्णयद् वर्ण्यमानं ततोऽतितरां सन्ताप--मवापेत्यर्थः। अन्योऽप्यतनुं प्रचुरं ज्वरं भजन्। यदि सरसीजले मज्जनं स्नानं करोति, तदा तस्य मज्जनस्य परिणतिर्बहुकालं शरीरान्तस्तापयन्ती सती विषमा दुःसाध्या सम्पद्यते ॥२॥

ध्रुवमधी-[४१, a]-तवतीयमधीरतां दयितदूतपतङ्गलवेगतः ।
स्थितिविरोधकरीं स्त्र्यणुकोदरी तदुदितः स हि यो यदनन्तरः ॥३॥

नूनमियमतितनुमध्या नलसन्देशहरपक्षिगमनस्याद् धीरतां कातरतामथवा--ऽस्थिरचित्ततामधीतवती शिक्षिता। कीदृशीम्? स्थितिः कुलकन्याव्यवस्थिति--स्तया सह विरोधमेकत्रानवस्थानलक्षणं करोति या। अथ च स्थितिर्गते--र्निवृत्तिर्गमनं चाधीरत्वं तस्या विरोधि। यत्र हि स्थितिस्तत्रैव कथं गतिः। ननु कथमेवं प्रतिजानीते भवानित्याह। हि यस्मात्। यः कश्चिद् घटादि--र्यस्मान्मृदादेरनन्तरो निकटसंश्लिष्टो दृश्यते, सोऽवश्यं तस्मादेवोदितः संभूत इति निश्चय एव। आनन्तर्यं योग्यतयैव ज्ञेयं कार्यकारणयोः। आदौ हि मृद् दृष्टा पश्चाद् घटः। तत्रादौ कुम्भकारसमीपे घटघटनावसरे गर्दभो--ऽप्यासीत्। स च क्वापि गतत्वान्न दृश्यते, तस्मादेव कथं न घटसिद्धिनिश्चय

इति चेन्न । तत्र योग्यताया अभावात् । शेषं प्रमाणशास्त्राद् गम्यम् ।

द्व्यणुकमेयोदरं यस्याः ॥३॥

अतितमां समपादि जडाशयं स्मितलवस्मरणेऽपि तदाननम् ।

अजनि पङ्गुरपाङ्गनिजाङ्गणभ्रमिकणेऽपि तदीक्षणखञ्जनः ॥४॥

भैमीमुखं विहसितलेशचिन्तनेऽपि जडाशयमज्ञान्तःकरणं सम्पन्नम् । तस्या ईक्षणमेव खञ्जनः खञ्जरीटो नेत्रान्तः, स्वाजिरभ्रमणिकालेशेऽपि पङ्गुः खञ्जो जातः, मुखविकासः कटाक्षश्च तदा तस्याः सर्वथाऽनवकाशावित्यर्थः। पङ्गुः श्रोणः। अन्योऽपि जडाशयः शिष्यादिः । पठितस्य न मनागपि स्मरति श्लेष्माभि[1]रतिजडाशयीकृतत्वात् । पङ्गुश्च निजाजिरचङ्क्रमणेऽपि न शक्तो भवति । पूर्वं हि तन्मुखं विहसनेऽ[2]धील्यऽभून्मेधावि च नयनखञ्जरीटश्च तर्णकवद्रतिचञ्चलोऽभूत् ॥४॥

किमु तदन्तरुभौ भिषजौ दिवः स्मरनलौ विशतः स्म विगाहितुम् ।

तदभिकेन चिकित्सितुमाशु तां मखभुजामधिपेन नियोजितौ ॥५॥

तस्या हृदि कामनैषधौ स्वर्गस्य वैद्यौ द्वौ विगाहितुं समपरिच्छेत्तुं प्रविष्टौ, तदा हि तावविनाभावेन तत्र तिष्ठतः। ततश्चद्(त)स्रयोस्सदनुरूपत्वादियं सम्भावना । ननु किमर्थं तत्र तयोः प्रवेश इति हेतुमाह । कीदृशौ ? नियोजिता-वादिष्टौ । केन ? मखभुजामधिपेन शक्रेण । किं कर्तुम् ? आशु तापानन्तरमेव तां चिकित्सितुं प्रतिकर्तुम् । यतः कीदृशेन ? तदभिकेन तस्याः कामुकेन । देवानां च देहान्तरसञ्चारणमपि सम्भवत्येव । यस्य च यो रुचितः स तस्य ज्वराधभिभूतस्य प्रतीकाराय सिद्धवैद्यौ नियोजयति ॥५॥ [81.b]

---

1. B1. श्लेष्मा— 2. B1 विहसते.

[४१.६] कुसुमचापजतापसमाकुलं कमलकोमलमैक्ष्यत तन्मुखम् ।
अहरहर्वहदभ्यधिकाधिकां रविरुचिग्लपितस्य विधोर्विधाम् ॥६॥

तस्या आस्यं दिनं दिनं सूर्यरश्मिक्लान्तस्य चन्द्रस्य विधामवस्थामधिकसमां वहद्धारयद् वीक्षितम् । यतः कीदृशम् ? कामजनितज्वरजर्जरं प्रकृत्या च पद्मवत् सुकुमारम् । विधाप्रकारः स च सादृश्यम् ॥६॥

तरुणतातरणिद्युतिनिर्मितद्रढिम तत्कुचकुम्भयुगं तदा ।
अनलसङ्गतितापमुपैतु नो कुसुमचापकुलालविलासजम् ॥७॥

तदा तस्मिन्नवसरे तस्याः कुचावेव कुम्भयुग्मं अनलसङ्गत्या वह्निसंसर्गेण तापं परिपचनं नोपैतु । काक्वा अपि तु उपैतु । कीदृशम् ? कामकुम्भकार-विचेष्टितसम्भूतम् । यतः कीदृशम् ? तारुण्यरविरुचिकृतकाठिन्यम् । अन्यदपि कलशयुगं तपनतापशोषितं सत् कुम्भकारचेष्टाविजृम्भितसम्भूतमापाकक्षेपपुरः-सरवह्निसंयोगसञ्जातं तापमाप्नोति । तत्त्वतस्तु नलेन सङ्गतिर्नलसङ्गतिर्न नलसङ्गतिरनलसङ्गतिस्तया तापस्तं युक्तं लभतामेव कामवशात् । अत्र कुलालस्तावत् कौ पृथिव्यां लालयति चक्रमिति कुलालः । कामस्तु कुत्सितं कृत्वा लालयति, स्पृहां कारयतीति कुलालः, कुत्सितस्पृहाकारकः । लल ईप्सायाम् । प्रथमपक्षे तु लल उपसेवायाम् ॥७॥

अभृत यद्विरहोष्मणि मज्जितं मनसिजेन तदूरुयुगं तदा ।
स्पृशति तत्कदनं कदलीतरुर्यदि मरुज्ज्वलदूषरदूषितः ॥८॥

कदलीतरुः सरसरम्भास्तम्भस्तत्कदनं कदर्थनं यदि परं मरौ धन्वनि ज्वलन् दीप्यमानो य ऊषर ऊषवान् भूभागस्तेन संसर्गवशाद् दूषितो बाधितः सन्ताप्य विकृतिं नीतः सन्, यदि परं स्पृशति नान्यथा । तत्रापि

स्पृशति छुपत्येव न तु सामस्त्येन भजते। तत्किमित्याह। यत्करजं तस्या ऊर्वोर्युगं सक्थिद्वयमभृत वहति स्म। कीदृशं मनसिजेन तस्मिन् काले वियोगा-ग्नितापे वियोगाग्नावेव मज्जितं प्रक्षिप्तं सदृशधर्मयोगादत्र विरहो वह्निरेव उत्पाद्योपमेयम् ॥८॥

स्मरशराहतिनिर्मितसंज्वरं करयुगं हसति स्म दमस्वसुः।
अनपिधानपतत्तपनातपं तपनिपीतसरःसरसीरुहम् ॥९॥

कामकाण्डप्रहारजनितसन्तापं भैम्याः पाणिद्वयं कर्तृ अनावरणसंसृज्यमान-रविधर्मं ग्रीष्मशोषितकासारकमलं व्यडम्बयत्। सरसीरुहमिति पृथक्वा। तपेन निपीतं सरो जन्महेतुर्जलाशयो यस्येति च व्याख्या ॥९॥ [१०.८]

मदनतापभरेण विदीर्य नो यदुदपाति हृदा दमनस्वसुः।
निबिडपीनकुचद्वययन्त्रणा तमपराधमधात् प्रतिबध्नती ॥१०॥

मदनतापभरेण कामज्वरातिरेकेण विदीर्य स्फुटित्वा दमयन्त्या हृदयेन यन्नो उत्पतितं उड्डीनं तमपराधं दूषणं निबिडयोर्घनयोः पीनयोर्मांसलयोः कुचयोर्यद्द्वयं तस्य यन्त्रणा प्रतिष्टम्भः। प्रतिबध्नती प्रतिगृह्णती सती दधौ। तद्विनिर्गत्य तापविश्लेषान्निर्वृतमभविष्यदेषा प्रतिबन्धं नाकरिष्यत्। एतेन स्मरज्वरेण तस्या हृदयं विदारणपुरःसरोत्पतनार्हमभूदिति भावः। अत्र गम्योत्प्रेक्षा ॥१०॥

निविशते यदि शूकशिखा पदे सृजति सा कियतीमिव न व्यथाम्।
मृदुतनोर्वितनोतु कथं न तामवनिभृत्तु निविश्य हृदि स्थितः ॥११॥

शूकं श्लक्ष्णतीक्ष्णाग्रं तस्य शिखा कोटिर्यदि दैवात् कस्यापि हालिकादेः पदे स्वभावकठिने पादतले निविशते प्रविश्य तिष्ठति, सा तस्य तत्रस्था

कियतीमिव कियत्प्रमाणवतीं व्यथां दुःखं न सृजति बहुभेदैर्जनयति। काक्वा विधिः। अपि त्वतिभूयसीं पीडां निर्मिमीत एव तु पुनरवनिभृत्पर्वतस्तस्या राज-पुत्र्या मृदुतनोः सुकुमाराङ्ग्या हृदि जीवस्थाने निविश्य स्थिरीभूय स्थितो भूतः सन् तां तादृशीमवर्णनीयां व्यथां कथं न वितनोतु, बहलीकरोतु। अपि तु करोत्येव। नितान्तोचितत्वाद्रसार्थेऽस्माकमनुमतमेव। तत्त्वतस्तु अवनिभृद् भूपतिर्नलः। हृदि चित्ते। शूकशिखेत्यादिपदानां साभिप्रायता यथायुक्ति सन्निवेश्य ॥११॥

मनसि सन्तमिव प्रियमीक्षितुं नयनयोः स्पृहयान्तरुपेतयोः।
ग्रहणशक्तिरभूदिदमीययोरपि न संमुखवास्तुनि वस्तुनि ॥१२॥

अस्या इमे इदमीये तयोरिदमीययोर्नयनयोः संमुखवास्तुन्य[1]भिमुखवर्तिन्यपि वस्तुनि पदार्थे ग्रहणे समुपादाने शक्तिर्नाभूत्। पुरो वर्तमानमपि घटादिपदार्थ-विशेषं सा नापश्यदित्यर्थः। अत्र हेत्वन्तरारोपरूपामुत्प्रेक्षामाह। मनसि सन्तं वर्त-मानं प्रियं नलं द्रष्टुमिच्छया मध्ये प्रविष्टयोरिवेति। नलैकतानमानसत्वादस्या इत्यमूहः। वसतीति वास्तु ॥१२॥

हृदि दमस्वसुरश्रुझरप्लुते प्रतिफलद्विरहात्तमुखानतेः।
हृदयभाजमराजत चुम्बितुं नलमुपेत्य किलागमि तन्मुखम् ॥१३॥

दमयन्त्या नयनवारिप्रस्रवणपूरिते हृदये प्रतिफलत्प्रतिबिम्बितं मुखं रेजे। प्रतिफलने हेतुमाह। कीदृश्याः? विरहेणात्ता प्राप्ता आसमन्तान्मुखस्यानतिर्यया तस्याः। कीदृशं रे-[10-b]-जे तदाह। किलेति सम्भावने। हृदयस्थितं नल-मुपेत्य चुम्बितमागमितमानीतमिव। मुखशब्दस्योक्तिस्वरूपत्वात् पौनरुक्त्यं न दोषः। अथवा प्रतिफलन्मुखं प्रतिबिम्बरूपमास्यमिति व्याख्येयम्। मुखप्रतिबिम्बस्य

1. B1. om. -भिमुख ----- -विशेषं सा.

भैम्या एवं सम्मुखीभूतत्वाच्चुम्बनं यथाकथञ्चिद् यत्नामानेयम् ॥१३॥

सुहृदमग्रिममुदश्वयितुं स्मरं मनसि गन्धवहेन मृगीदृशः ।
अकलि निःश्वसितेन विनिर्गमानुमितनिह्नुतवेशनमायिता ॥१४॥

गन्धवहेन वायुना विनिर्गमानुमितनिह्नुतवेशनमायिता । अकलि धृता । माया विद्यते यस्यासौ मायी । निह्नुतवेशने अलक्षितप्रवेशे मायी छद्मवान्, तस्य भावो मायिता विनिर्गमने निःसरणेनानुमिता तर्किता चासौ निह्नुतवेशनमायिता च । अथवा विनिर्गतानुमितनिह्नुतवेशनमाया विद्यते यस्य स तस्य भावः । मत्वर्थीयाद्बहुव्रीहिरेतच्च नात्रादृतं भूमादिविशेषस्य वक्तुमिष्टत्वात् । केन कृत्वा अकलीत्याह । निःश्वसितेन श्वासेन । किं कर्तुमेवं कृतमित्याह । भैम्या मनसि वर्तमानं स्मरं काम-मेवाग्रिमं सुहृदं सखायमुदश्वयितुमुद्दीपयितुम् । वायुः प्रविशन्नदृष्टः उष्ण-निःश्वासरूपश्च निःसरन् दृश्यते । ततोऽयमूहः । सा दीर्घमुष्णं च निःश्वास-ममुञ्चदित्यर्थः ॥१४॥

विरहपाण्डिमरागतमोमषीशितिमतन्निजपीतिमवर्णकैः ।
दश दिशः खलु तद्दृगकल्पयल्लिपिकरी नलरूपकचित्रिताः ॥१५॥

नूनं तस्या दृग् दृष्टिरेव लिपिकरी चित्रकरी कर्त्री दशसङ्ख्याका दिश आशा नलस्य रूपकैः प्रतिच्छन्दैश्चित्रिता आलिखिता अकल्पयत् ससर्ज । कैः कृत्वा विरहस्य पाण्डिमा शुक्लत्वं राग आसक्तिलक्षणः । अथ च रागः सिन्दूरादिः । तमो मोहः । कार्ष्ण्यात् स एव मषी प्रसिद्धा । तदेव शितिमा, तस्य वा शितिमा नीलत्वं तादृशो निज आत्मीय एव पीतिमा गौरत्वं, तान्येव वर्णकानि, वर्णकाश्चित्रकर्मोपयोगिनः प्रसिद्धास्तैः । चित्रे चतुर्वर्णा वर्णकाः प्रसिद्धा एव । सा विश्वं नलमयमपश्यदित्यर्थः ॥१५॥

स्मरकृतिं हृदयस्य मुहुर्दृशां बहु वदन्निव निःश्वसितानिलः ।
व्यधित वाससि कम्पमदःश्रिते त्रसति कः सति नाश्रयबाधने ॥२६॥

निःश्वासपवनः अमूं दमयन्तीं श्रितमदःश्रितं तस्मिन्नदःश्रिते वाससि भैमी-देहस्थे वस्त्रे कम्पं स्फुरणं व्यधित चक्रे। उत्प्रेक्ष्यते। बहु समधिकं यथा स्यादेवम्। वदन् कथयन्निव। कां दृशामवस्थां किं वस्तु इ-[११.८]-त्याह। स्मरकृतिं कामनिर्माणम्। ननु वस्त्र[1] कम्पात् हृदयस्य बह्वी बाधा कथं ज्ञायत इत्याह। यत आश्रयबाधने अवष्टम्भभूताधारोपद्रवे सत्याश्रित आधेय-भूतः को न त्रसति। अपि तु सर्वः कोऽप्युद्विग्न एव। भयात् कम्पो भवत्येव। अत्र हृदयबाधायां दमयन्त्या बाधा प्राप्यते। अथवा भैमी प्राकरणिकी। भैम्या अदः एतद् हृदयं श्रिते वाससीति व्याख्येयम् ॥२६॥

करपदाननलोचननामभिः शतदलैः सुतनोर्विरहज्वरे ।
रविमहो बहुपीतचरं चिरादनिशतापमिषादुदसृज्यत ॥२७॥

भैम्या वियोगतापे सति करपदाननलोचननामभिः शतदलैः कमलैरनवरतोष्म-च्छलात् सूर्यतेज उत्सृष्टमुद्वान्तम्। कीदृशम्? पूर्वं बहुपीतं बहुपीतचरम्। करौ च पदे चाननं च लोचने च एतान्येव नामानि येषां तैः। एतानि साक्षात् कमलान्येव केवलं भैमीसम्बन्धान्नामान्येवान्यानि। शतदलानि चावश्यं रविमहः पिबन्ति। अन्यथा सश्रीकत्वादिगुणायोगादेतैरपि तत् पीतमेव। तदेवैतदुद्गीर्णम् ॥२७॥

उदयति स्म तदद्भुतमालिभिर्धरणिभृद्भुवि तत्र विमृश्य यत्।
अनुमितोऽपि च बाष्पनिरीक्षणाद् व्यभिचचार न तापकरोऽनलः ॥२८॥

---

1. Bl. om. वस्त्र.

तदद्भुतमाश्चर्यमुदयति स्मोदितं तत्किमित्याह। यत्र तत्र धरणिभृत्भुवि राजपुत्र्यां भैम्यां तापकरो ज्वरहेतुर्नलो नैषधो न व्यभिचचार। नासत्यो बभूव। अपि तु सत्य एव सञ्जातः। कीदृशः? अनुमितस्तर्कितः। कस्मात्? बाष्पनिरीक्षणादपि च। अश्रुदर्शनादपि न परं कस्मादपि विशिष्टचिह्नात् बाष्पनिरीक्षणादपि चेत्यर्थः। काभिः? आलिभिः सखीभिः। किं कृत्वा? विमृश्य विचार्य। तां तथाऽश्रुवर्षपरायणामवलोक्यालीभिः परस्परमनुमानं कृतं नूनमियं नलकृते एवं तप्यते। न हि धरण्यां नलादन्यो युवा कोऽप्यस्ति यदर्थमिय-मेवं विचेष्टत इति। तच्च तथैवास्तीत्यादिविवृत्य व्याख्येयम्। अत्र चार्था-न्तरम्। तत्र धरणिभृद्भुवि पर्वतभूमिकायां तापकर उष्मजनकोऽनलो वह्निर्न व्यभिचचार नासत्यो बभूव। यत् तदद्भुतमुदितमिति। अनलः कीदृशः? अनुमित ऊहितः। कस्मात्? बाष्पस्य तडागादिजलाशयोत्पन्नधूमाकारस्योष्मणो-ऽपि च दर्शनात्। कैरनुमित इत्याह। आलिभिः। अलं मिथ्या विद्यते येषां ते आलिनस्तैः। आलिभिः सम्यक् तर्कानभिज्ञैः। किं कृत्वा विमृश्य विचार्य। धूमदर्शनादनुमितो वह्निस्तावन्न व्यभिचरति स्म। माघे मासि प्रातःकाले बालैर्बाष्पदर्शनादपि चानुमित उष्णत्वगुणयुक्तो वह्निर्न व्यभिचरति स्मेति चित्रम्। विमर्शनादिल-[91.b]-क्षणं त्वत्राप्रस्तुत्यादुपेक्षितम् ॥९८॥

हृदि विदर्भभुवः प्रहरन् शरै रतिपतिर्निषधाधिपतेः कृते।

कृततदन्तरगस्वहृदव्यधः फलदनीतिरमूर्च्छदलं खलु ॥९९॥

दमयन्त्या हृदि वर्तमानो रतिपतिः कामोऽमूर्च्छद् ववृधे। किं कुर्वन्? नलस्य हेतोः शरैः प्रहारं कुर्वन्। अर्थात् हृदि। अथ चामूर्च्छन् मोहं प्रापे-त्यर्थान्तरम्। खलु नूनं फलदनीतिः सन्नमूर्च्छत्। यतः कीदृशः?

कृतो विहितस्तदन्तरगस्य हृन्मध्यस्थितस्य स्वस्यात्मनो दृढो गाढतरो व्यधो भेदनं येन स तथा। यो हि यन्मध्यस्थितो भवति, स तमेव यदि पीडयति ततोऽवश्यं सोऽपि पीड्यते। एतच्चानयफलं प्रसिद्धमेव। कामश्च हृदयस्थः। फलन्ती धरमाना अनीतिर्यस्य स फलदनीतिः ॥१९॥

विधुरमानि तया यदि भानुमान् कथमहो स तु तद् हृदयं तथा।

अपि वियोगभरास्फुरणस्फुटीकृतदृषत्त्वमजिज्वलदंशुभिः ॥२०॥

तया भैम्या विरहवशाद् यदि विधुश्चन्द्रो भानुमानमानि खरकिरणः परिकल्पितः अहो चित्रं तु पुनः स विधुस्तस्या हृदयमंशुभिः[1] कृत्वा तथा तेन प्रकारेण कथमजिज्वलत्, केन विधानेनादीपयत् कीदृक् हृदयं वियोगभरेण विरहगौरवेण यत् स्फुरणं तेन स्फुटीकृतं प्रकटतां नीतं दृषत्त्वं प्रस्तरशिलापटुत्वं यस्य तत्। तया किल चन्द्रश्चण्डकरत्वेन परिकल्पितः स कथं सत्य एवाभूदिति चित्रम्। अंशुभिर्ज्वलनाच्च तस्य चन्द्ररश्मित्वमायातमेव। यश्च रश्मिभिः कृत्वा शिलामपि ज्वलयति स कोऽपि चण्डतमो मार्तण्डः। यच्च तथाविधेन वियोगभरेण न स्फुटति तदवश्यं प्रस्तरमयम्। अनया[2] भङ्ग्या तस्य हृदयस्य तापश्चन्द्रमसश्चास्या[3]तितापकारित्वमुक्तम् ॥२०॥

हृदयरत्नसरोरुहया तया क्व सदृगस्तु वियोगनिमग्नया।

प्रियधनुः परिरभ्य हृदा रतिः किमनुमर्तुमशेत चितार्चिषि ॥२१॥

हृदि विन्यस्तकमलया त्वया सदृशी त्रिभुवनेऽपि का वधूरस्तु, काक्वाऽपि तु नास्त्येव। अथवा दयितस्यायुधं धनुरेव हृदयेनाश्लिष्य तस्य पार्श्वात् प्राणांस्त्यक्तुं किमु रतिः कामजाया चितार्चिषि वह्नावशेत शयितास्तीति सम्भावना।

1. B1. हृदयमश्रुभिः 2. B1. अन्यथा 3. B1. -श्चास्मा-

अर्चिषां बाहुल्यात् तेषामेव निर्देशः कृत उपचारात्। कामस्य चात्यन्तिको देहाभावः प्रसिद्ध एव भगवता भवेन भस्मीकृतत्वात्। अन्याऽपि काऽपि पतिव्रता परोक्षमृतस्य पत्युर्देहमनासाद्य तस्य शस्त्रवस्त्रादि किमपि हृदये दत्वानुमर्तुं[1] चितादहनमधिशेते ॥२१॥

अनलभावमियं स्वनिवासिनो न विरहस्य रहस्यमबुध्यत।

प्रशमनाय विधाय तृणान्यसून् ज्वलति तत्र यदुज्झितुमैहत ॥२२॥

[१२.८] इयं भैमी स्वस्मिन् वर्तमानस्य विरहस्य वियोगस्य रहस्यं परमार्थमनलभावं नलाप्राप्तिमेव नाबुध्यत नाज्ञासीत। या नलस्याप्राप्तिः स एवायं विरह इति तया सूक्ष्मोऽर्थो न ज्ञातः। कथमेवं ज्ञायत इत्याह—यत्कारणात् तस्मिन् विरहे ज्वलति संदीप्यमाने सति प्रशमनाय मन्दभावायार्थात् तस्यैवासून् निजप्राणानेव तृणानि विधाय तृणवत् हेलयैव उज्झितुं त्यक्तुमैहता-चेष्टत। प्राणत्यागे हि वियोग आत्यन्तिकः स्यात्। मरणे सति हि कुतो नलेन सङ्गः। अथ चार्थान्तरम्। इयमात्मनि वर्तमानस्य विरहस्य परमार्थमनलभावं[2] वह्नित्वं नाबुद्ध्यत, इयं संदीप्यमाने तस्मिन्ननले विषये असूनेव तृणानि शुष्कं ~~खटं~~ [शरं][3] कृत्वा प्रशमनाय क्षेप्तुमैहत। तृणेषु हि तत्र प्रक्षिप्तेषु वह्निरधिकं ज्वलति ॥२२॥

प्रकृतिरेतु गुणः स न योषितां कथमिमां हृदयं मृदु नाम यत्।

तदिषुभिः कुसुमैरपि दुन्वता सुविवृतं विबुधेन मनोभुवा ॥२३॥

स योषितां प्रकृतिर्गुणः स्त्रीणां स्वभावो धर्मः स्त्रीत्वादिमां कथं नैतु, अपि तु प्राप्नोतु। को गुण इत्याह। यत् नाम प्रकटं हृदयं मृदु कोमलम्। स्त्रीणां

1. Bl. दत्ता- 2. B. -भावत्वं. 3. Bl. क्षत्वा

हृदयं सत्यं कोमलं यत् । अयं स्त्रीणां स्वाभाविको गुणस्तद्दस्या अपि स्त्रीत्वात् स्वभावत एव कोमलं हृदयं वर्तते । ननु हृदयस्य दुर्बोधत्वात् कथमेवं निश्चित-मित्याह । मनोभुवा विबुधेन कामपण्डितेन तत् पुष्पैरपि[1] रोपैः [पुष्परूपैरपि] [शरैः] अपतापयता सुष्ठु कृत्वा विवृतं व्याख्यातम् । यदि कुसुमैरपि तत् कोमलं न भवेत् तत्कथं तेनोपतापं[2] [ततोऽपतापं] प्राप्नुयात् । कुसुमानां च मार्दवं प्रसिद्धमेव । तत्त्वतस्तु कामेन विबुधेन देवेन सुष्ठु प्रकटितमेवं कुर्वता । तच्च प्रत्यक्षमेव । [3]नातिकठिनहृदया नायकस्य गुणमात्रश्रवणादेवं भिद्यते ॥२३॥

रिपुतरा भवनाद्विनिर्यतीं विधुरुचिर्गृहजालबिलैर्नु ताम् ।
इतरथात्मनिवारणशङ्कया ज्वलयितुं बिसवेषधराविशत् ॥२४॥

मृणालानि तद्विरहतापापनुत्तये समाहृतानि कविभङ्ग्या वर्णयति । नु सम्भा-वयामि (म.) । मृणालरूपधारणी तां दीपयितुं चन्द्रकान्तिः प्रविष्टा । ननु स्वरूपेणैव किमिति न प्रविश्य ज्वलयतीत्याह । इतरथा उक्तप्रकारवैपरीत्येना-त्मनिषेधभयेन यदि स्वरूपेण प्रविशति, तदा वस्त्रादिना निवार्यते । कैः कृत्वा प्रविष्टेत्याह । भवनगवाक्षविवरैः । किं कुर्वन्ती ताम् । गृहाद् बहिर्निःसरन्तीम् । अत एव गृहजालप्रवेशः । यतः कीदृशी सा ? रिपुतरा प्रकर्षेण शत्रुः [१२.b] अन्योऽपि नितान्तशत्रुः कमपि शत्रुं भयान्निर्गतमपि यथाकथञ्चित् तं पराभवति ॥२४॥

हृदि विदर्भभुवोऽश्रुभृति स्फुटं बिजमदास्यत्तया प्रतिबिम्बितम् ।
मुखदृगोष्ठमरोपि मनोभुवा तदुपमाकुसुमान्यखिलाः शराः ॥२५॥

मुखं च दृशौ चोष्ठौ च मुखदृगोष्ठम् । भैम्या हृदि अखिलाः पञ्चसङ्ख्याकाः शरा एव [4]मनोभुवा । के शरा इत्याह । तस्य मुखदृगोष्ठस्योपमा कुसुमानि

---

1. B. पुष्परूप– 2. B1. तनोप– 3. B. न हि. 4. B1. मनोभुवा अरोपि

कमलनीलोत्पलबन्धूकानि । कीदृशीं तत् । प्रतिबिम्बितं प्रतिफलितम् । कया विनम-
-हास्यतया । विनमद्दास्यं यस्यास्तस्या भावस्तत्ता तया । अवाङ्मुखत्वेन । अर्थात्
हृदि प्रतिबिम्बितम् । प्रतिफलने सविशेषं हेतुमाह । कीदृशे हृदि ? अश्रुभूति।
नयनजलप्लुते । अत एव स्फुटं यथा स्यादेवं प्रतिबिम्बः ॥२५॥

विरहपाण्डुकपोलतले विधुर्व्यधित भीमभुवः प्रतिबिम्बितः ।
अनुपलक्ष्यसितांशुतया मुखं निजसखं सुखमङ्कमृगार्पणात् ॥२६॥

विधुश्चन्द्रो भैम्या मुखं निजसखमात्मसुहृदं सुखमनायासेनैव व्यधित चक्रे।
कस्मात् ? चिह्नहरिणोपढौकनात् । कीदृशः ? वियोगसितगण्डमण्डले प्रतिफलितः ।
कया कृत्वा एवं चकारेत्याह । अनुपलक्ष्यसितांशुतया । अनुपलक्ष्या अचिह्न्याः
सिताः पाण्डवोऽंशवो यस्य तस्य भावस्तत्ता तया । कपोलतलं पाण्डु, तत्र
प्रतिबिम्बितो विधुरपि पाण्डुः । तयोः समानवर्णत्वादभेदः, कृष्णं तु चिह्नं व्यक्तं
दृश्यते । पूर्वकालं सकलङ्के विधुर्निष्कलङ्केन भैमीमुखेन सार्धं सौहृदं कर्तु-
-मुपायं नापश्यत् । इदानीं तु लक्ष्महरिणं ढौकयित्वा हेलयैव तत्सखिभावमनयत्।
अन्योऽपि कश्चन वनेचरादिरनर्होऽपि मृगोपनयनात् नृपं तदात्मजं वा सुखेन
सखायं रचयति । एतेन तस्याः कपोलयोर्विरहदाहपाण्डुरयोः कालिमा[1] निविष्ट
इति भावः । सिते जलादौ प्रतिबिम्बितः सितपदार्थो व्यक्ततया विभाव्यते
न वेति स्वल्पानुभवेन वेदितव्यम् ॥२६॥

विरहतापिनि चन्दनपांशुभिर्वपुषि आर्पितपाण्डिमण्डना ।
विषधराभबिसाभरणा दधे रतिपतिं प्रति शम्भुविभीषिकाम् ॥२७॥

सा भैमी रतिपतिं प्रति काममनुसन्धाय शम्भुविभीषिकां त्रिनयनभाषिकां[2]

1. B1· कालिका·   2. B1·-भापिका·   8· - भापकां·

[1]दधे। कीदृशी सतीत्याह। विरहतापिनि वियोगसन्तप्ते वपुषि देहे चन्दनपांशुभि-
-र्मलयजरजोभिरर्पितो न्यस्तः पाण्डिमा सितत्वमण्डनं यया। तथा विसधरणा-
-भियाभि च्छविर्येषामेवंभूतानि बिसानि मृणालान्येवाभरणं यस्याः सा तथा।
विरहदहनसन्तप्ते हृदि विनिहितो [१३.८] [2]मलयजपङ्कस्तस्या झटिति विशुष्य
रजःकणीभूय निखिलां तनुं धवलीचकार। तदनु यथास्थानं तथा मृणालानि
वलयपदानि लम्भितानि तेषां च शैत्यं प्रसिद्धमेवेति गम्येयमुत्प्रेक्षा। भगवांश्च
[3]भवांश्च भवानीधवः किल भूतिलेशवेषप्रियो भुजङ्गाभरण सङ्गचलाङ्गश्च ॥२७॥

विनिहितं परितापिनि चन्दनं हृदि तया धृतबुद्बुदमाबभौ।
उपनमत्सुहृदं हृदयेशयं विधुरिवाङ्कगतोडुपरिग्रहः ॥२८॥

तया तापाधिके हृदये स्थापितं मलयजं धृतबुद्बुदं सत् विधुश्चन्द्र इव शुशुभे। कीदृशो विधुरित्याह। अङ्कगत उत्सङ्गस्थ उडून्येव परिग्रहो दारा यस्य स तथा। ननु किमर्थं तस्य तत्रागम इत्याह। किं कुर्वन्? हृदयेशयं चित्तस्थं कामं सुहृदं सखायमुपनयन्नुपतिष्ठन् संश्रयन्नित्यर्थः। चन्द्रो हि विरहिणीनामसहाय एव [4]दाहाय किं पुनः परिग्रहसहायः। परिग्रहो भार्या परिच्छदश्च। तदा च तस्य मण्डलाकारेण हृदि दत्तस्य चन्दनपङ्कस्य तद्दाहातिरेकात् धृतबुद्बुदस्य स परिग्रह चन्द्रग्रहविग्रहसारूप्यादियमुत्प्रेक्षा ॥२८॥

स्मरहुताशनदीपितया तया बहु मुहुः सरसं सरसीरुहम्।
श्रयितुमर्धपथे कृतमन्तरा श्वसितनिर्मितमर्मरमुज्झितम् ॥२९॥

तया भैम्या बहु प्रभूतं सरसमार्द्रं सरसीरुहं [5]जलजं मुहुर्वारंवारमुज्झितं संत्यक्तम्। कीदृशम्? श्रयितुं तनौ सङ्गमयितुमर्धपथे सरसीरुहाधारपात्रदेहयोर्मध्यभागे

---

1. B1. निदधे. 2. B. बहलमलयज- 3. B1. om. भवांश्च, 4. B. यदाहाय.
5. B1. जलरुहं.

नीतं खरुज्झितमित्यर्थः। किमिति वपुष्यरन्त्यैव क्षिप्तमित्याह। अन्तरा मध्य-
-भाग एव श्वसितेनोष्णेनोच्छ्वासेन निर्मितं रचितं मर्मरं[1] सूक्ष्मं चूर्णं यस्य तत्।
यतः कीदृश्या तया कामाग्निज्वलिततयेति श्रयणे निश्वसित सौष्मत्वे च हेतुः॥२९॥

प्रियकरग्रहमेवमवाप्स्यति स्तनयुगं तव ताम्यति किं न्विति।
जगदतुर्निहिते हृदि नीरजे श्वयथुकुड्मलनेन पृथुस्तनीम् ॥३०॥

नु सम्भावने हृदये धृते द्वे जलजे श्वयथुकुड्मलनेनोपतापमुकुलनेन कृत्वा
पृथुस्तनीं विपुलकुचां भैमीमित्थेवं जगदतुः गदतः स्म इति। कथमित्याह।
हे भैमि! तव स्तनयुगं वक्षोजद्वयमेवमनेन प्रकारेण प्रियकरग्रहं दयितहस्त-
-मवाप्स्यति लप्स्यते। ताम्यति सन्तप्यते किं कुतो हेतोः सन्तापोऽस्य नैव
युक्तः। अत्र च करसंज्ञानुकृतिरस्यार्थस्य व्यञ्जिका। तस्माच्छिष्येभ्यः साभिनीय
प्रदर्शनीया[2] ॥३०॥

त्वदितरो न हृ-[९३-८]-दापि मया धृतः पतिरितीव नलं हृदयेशयम्[3]।
स्मरहविर्भुजि बोधयति स्म सा विरहपाण्डुतया निजशुद्धताम् ॥३१॥

सा भैमी निजशुद्धतामात्मनिर्दोषतामिव बोधयति स्म ज्ञापयामास। कं प्रयोज्यं
नलम्। कीदृशम्? हृदयेशयं स्वान्तस्थम्। कया कृत्वा विरहपाण्डुतया वियोगपाण्डिम्ना।
कथं बोधयति स्म इति। इति कथमित्याह। हे राजन्! त्वदितरो भवद्भ्यः पति-
-र्नाथो मया हृदा मनसाऽपि न धृतो गृहीतः। क्व बोधयति स्मेत्याह। स्मर-
-हविर्भुजि कामाग्नौ। पाण्डुर्हि शुचिस्तेन च शुद्ध उच्यते, तेनापि च निर्दोषः।
अन्यापि सती युवती पत्यन्तरशङ्कितं पतिं शपथभावेन वह्नौ निजशुद्धतां
बोधयति। अशुद्धा हि दह्यते, शुद्धा तु कान्त्या कीर्त्या च पाण्डुर्धवलेव भवति।

1. सूक्ष्मं चूर्णं ? [मर्मरं = शुष्कपर्णध्वनितं]. 2. B1. दर्शनीया. 3. B1, B. हृदयस्थितम्.

इत्थं शुद्धाशुद्धेति च हस्तकरतालं कौतुकिभिर्नृपैः सद्(सं)घोष्यते ॥३१॥

विरहतप्ततदङ्गनिवेशिता कमलिनी निमिषद्दलमुष्टिभिः ।
किमपनेतुमचेष्टत किं पराभवितुमैहत तद्दवथुं पृथुम् ॥३२॥

कमलिनी पद्मिनी[1]लताविवियोगोष्णभैमी देहनिहिता सती संकुचत्यत्र मुष्टिभिः कृत्वा तस्याः पृथुं बहुलं दवथुमुपतापं किमपनेतुमपासितुमचेष्टत ऐहत । किं पराभवितुं हन्तुमैहताचेष्टत मुष्टिना हि द्वयमपि घटते भरणपूर्वकमपनयनं च हननं च । अङ्गुलीनां रचनाविशेषो मुष्टिः । कमलिनी पुटकिनी स मूलदलो-त्पाट्यानीय तस्या वपुषि संस्थापिता । अत्यौष्ण्यवशाच्च तस्याः पत्राणि मुष्टि-वत् संकुचितानि तत इयमुत्प्रेक्षा ॥३२॥

इयमनङ्गशरावलिपन्नगक्षतिविसारिवियोगविषावशा ।
शशिकलेव खरांशुकरार्दिता करुणनीरनिधौ निदधौ न कम् ॥३३॥

अनङ्गस्य शराणामावलिः श्रेणिरेव पन्नगा विषधरास्तेषां क्षतयो दन्तस्थानरूपा व्रणा-स्तत्र विसारि समारोहणशीलं यद् वियोगरूपं विषं तेनावशा विह्वला[2] सती सा भैमी कं प्राणिनं वीक्षितारं करुणनीरनिधौ कारुण्यसमुद्रे न मज्जयति स्म ॥ अपि तु सर्वं कमप्यमज्जयत् । केव । चन्द्रखण्डभानुकरकदर्थिता चन्द्रकलेवेव । यथा सा सर्वान् दयारसाब्धौ मज्जयति, तथा साऽमज्जयदित्यर्थः ॥३३॥

ज्वलति मन्मथवेदनया निजे हृदि तयार्द्रमृणाललतार्पिता ।
स्वजयिनोः स्वपया सविधस्थयोर्मलिनतामभजद्भुजयोर्भृशम् ॥३४॥

मन्मथव्यथया दीप्यमाने स्वहृदये सरसबिसवल्ली धृता सती मालिन्यमाप सप्तत्वादेव । तत्र[3] सम्भावना भृशं बाढं निज-[१४.a]-पराभावुकयोर्निकटस्थयोर्बाहु-

1. B1. पद्मं, 2. B1. विधुला. 3. 8. तन्न.

-मतयोर्लज्जया । अन्योऽपि स्वजयिनो निकटस्थस्य लज्जया मालिन्यं भजति, तयोरस्य मार्दवं मृणाललतातो दूरमतिरिच्यते बाढं दृढं निश्चितमिति यावत् ॥३४॥

पिकरुतिश्रुतिकम्पिनि शैवलं हृदि तथा निहितं विचलद् बभौ ।
सततत्दगतहृच्छयकेतुना हतमिव स्वतनूघनघर्षिणा ॥३५॥

कोकिलालापश्रवणकम्पे हृदये तथा दत्तं शैवालं विचलद् विस्फुरद् रेजे । उत्प्रेक्षते । अनवरतं तस्मिन् हृदि गतः प्रविष्टो योऽसौ हृच्छयो मनोभूतस्य केतु चिह्नं (केतुश्चिह्नः) यो मकरो मत्स्यो वातेनाहतमाताडितमिव । कीदृशेन ? स्वा च सा तनूश्च तां घनं निरन्तरं घर्षति विलिखतीत्येवंशीलस्तेन । यत्र च कामस्तत्र तत्केतु भवत्येव, शैवलं च दृष्ट्वा पूर्वपरिचयान्निर्गत्य मिलनार्थं चासो (मत्स्यो) ऽवश्यं निजतनूं घर्षति ॥३५॥

न खलु मोहवशेन तदाननं नलमनः शशिकान्तमबोधि तत् ।
इतरथा शशिनोऽभ्युदये ततः कथमसुस्रुवदश्रुमयं पयः ॥३६॥

खलु नूनं नलमनः कर्तृ तत् तादृशं तस्या आननं मुखं कर्मताऽपन्नं मोह-वशेनाज्ञानभावेन भ्रमपारतन्त्र्येण शशिकान्तमिन्दूपलं नाबोधि, नाज्ञासीत्, अपि तु भ्रान्तिं विनैव कथमेवं निश्चिय[2] इत्याह । इतरथा यदि पूर्वोक्तप्रकारो विपरीतो भवेत् ततस्तदाननात् सकाशाच्चन्द्रस्योद्गमे सति बाष्परूपं जलं कथं स्रुवति स्म । यस्मादिन्दूदये तस्माज्जलं सुस्राव, तत एव तच्छशिकान्तमेवेति श्लोकार्थः । तत्त्वतस्तु शशिवत्कान्तं मनोहरं भ्रान्तिं विनैव नलेन ज्ञातमत एव स तस्या-मनुरागवानभूद् यतश्चैवं तत एव सा तद्विरहाद्वैवं व्यचेष्टत । चन्द्रोदये चन्द्र-कान्तोपलेभ्यो जलं स्रवतीति प्रसिद्धमेव ॥३६॥

---

1. १. तयो: 2. निश्चिय ?

रतिपतेर्विजयास्त्रमिषुर्यथा जयति भीमसुतापि तथैव सा।

स्वविशिखानिव पञ्चतया ततो नियतमैहत योजयितुं स ताम्॥३७॥

कामस्य यथा स्वकीयेषुवर्गाणो विजयप्रधानमस्त्रमायुधं जयति सर्वोत्कर्षेण वर्तते। तथा तेनैव प्रकारेण सा दमयन्त्यपि विजयास्त्रमस्त्येति निश्चयः। नियतं निश्चितं ततो हेतोः रतिपतिस्तां भैमीं पञ्चतया पञ्चसङ्ख्यात्वेन योजयितुं सङ्गमयितुमचेष्टत। कामेन हि निज इषुर्यथाकथञ्चित् पञ्चसङ्ख्यात्वं नेय इति श्लेषार्थः। तत्त्वतस्तु पञ्चता कालधर्मो मरणमिति यावत्॥३७॥ [94.6]

शशिमयं दहनास्त्रमुदित्वरं मनसिजस्य विमृश्य वियोगिनी।

झटिति वारुणमश्रुमिषादसौ तदुचितं प्रतिशस्त्रमुपाददे॥३८॥

सा विरहिणी यतस्तत एव कामस्य चन्द्रमाग्नेयास्त्रमुदयनशीलं विचार्य शीघ्रमेव बाष्पव्याजात् तस्याहं प्रतीपं वरुणदैवतमस्त्रं जग्राहेति अनुमानमेव। शरदृतुश्चात्र प्रतीयते॥३८॥

अतनुना नवमम्बुदमाम्बुदं सुतनुरस्त्रमुदस्तमवेक्ष्य सा।

उचितमायतनिःश्वसितच्छलाच्छ्वसनशस्त्रममुञ्चदमुं प्रति॥३९॥

सा चार्वङ्गी कामेन नवं मेघमेवाम्बुदं मेघदैवतमस्त्रमुदस्तमुत्क्षिप्तं सज्जितं सम्भाव्य दीर्घश्वासनिभात् तस्य योग्यं श्वसनशस्त्रं वायुदैवतमन्त्राभिमन्त्रितमायुधममुमतनुं प्रत्यमुञ्चच्चिक्षेप। अत्र वर्षा॥३९॥

रतिपतिप्रहितानिलहेतितां प्रतियती सुदती मलयानिले।

तदुरुतापभयात् तमृणालिकामयमियं भुजगास्त्रमिवाददे॥४०॥

सुदती भैमी मलयानिलविषये रतिपतिना कामेन प्रहिता क्षिप्ता याऽनिलहेतिर्वायव्यास्त्रं तस्या भावस्तत्ता तां प्रतियती प्रतिगच्छन्ती जानती सती भुजगास्त्रं

सर्पैर्वतमस्त्रमिव ग्रगाह। कीदृशम्? तस्यार्द्रम्। यतः पवनो हि सर्पाणामशनम्। कीदृशम्? तस्य रतिपतेरूरधिको योऽसौ तापस्तस्माद्भयं तत आत्ता गृहीता या मृणालिका बिसलता तद्रूपम्। वसन्तोऽत्र स्फुट एव। प्रतियतीतीण् गतौ शम्बूऽनूः[1] ॥४०॥

व्यधित तद्धृदि शल्यमिव द्वयं विरहितां च तथापि च जीवितम्।

किमथ तत्र निहत्य निखातवान् रतिपतिः स्तनबिल्वयुगेन तत् ॥४१॥

रतिपतिः कामः प्रथमं तस्या हृदि द्वयं शल्यमिव शल्यवत्[2] शल्यसदृशं किञ्चिद्व्यधित निवेशयति स्म। अथ पश्चात् तद् द्वयं निहत्य गाढं हत्वा तत्र हृदि निखातवान्निखनति स्म। केन निहत्येत्याह। स्तनावेव बिल्वयोर्युगम्। तेन तथा संविधानस्य तत्र सङ्गच्छमानत्वादित्थमूहः। किं द्वयमित्याह। विरहितां च तथापि च विरहेऽपि सति जीवितं प्राणधारणम्। शल्यं दुःखदायि। मर्मस्थाने प्रविश्य स्थितं कीलककण्टकादि प्रसिद्धम्। तत् सादृश्यात् तद् द्वयं शल्यम्। तद् द्वयं हि तदा तस्यास्तत्रस्थं नितान्तं शल्यायमानमस्ति। विरह एव नितान्तदुःखदायि, तस्मिन् सति तु जीवितस्य दुःखदायित्वं किमुच्यते। यदि हि जी-[१६-ब]-वितं ततो निर्गच्छेत् ततो विरहोऽपि तदनुव्रजेत्। स्तनयो रामणीयकवशेनावश्यं नल-प्राप्तिर्भविष्यतीति निश्चित्य सा विरहदुःखसन्तप्तापि जीवितं नात्यजदिति भावः। अन्योऽपि व्यापि शल्यद्वयं प्रथमं निदधाति, तदनु बिल्वद्वयेन निहत्य निखनति। तद्बिल्वद्वयं च तत्रैव पतितं दृढतया याति। 'शल्यमिव' इत्यत्रेवशब्दः स्वरूपार्थ एव, न तूपमार्थः ॥४१॥

अतिशरव्ययता मदनेन तां निखिलपुष्पमयस्वशरव्ययात्।

स्फुटमकारि फलान्यपि मुञ्चता तदुरसि स्तनतालयुगार्पणा ॥४२॥

---

1. Bl. शम्बूऽडतम्. 2. B. शिल्पवत्.

नूनं कामेन तस्या उरसि स्तनावेव ताले तालफले तयोर्युगं तस्यार्पणा ढौकनं कृतम् । किं कुर्वता ? फलान्यपि क्षिपता सता । कस्मात् ? निखिलाः पुष्पमया ये स्वस्य [1] स्वकीयशरास्तेषां व्ययात् । ननु कुतस्तस्य समस्तप्रशस्तप्रसूनमयपत्रिव्यय इति । तत्र हेतुगर्भविशेषणमाह । किं कुर्वता मदनेन तां भैमीमतिशरव्ययता नितान्तं वेध्यीकुर्वता । अन्योऽपि कोऽपि धन्वी प्रकोपितया यदि कञ्चन प्रतिपक्षं लक्ष्यं काण्डैरतिविध्यन्निःकाण्डो भवति, तदा स्वसमीपवर्ति लोष्टेष्टकादिकमपि क्षिपति । प्रसूनफलयोस्तु सान्निध्यं प्रसिद्धमेव । पूर्वोपमानस्यारुच्योपमानान्तरमेतत् । बिल्वौ खल्विमौ स्तनौ विपुलाविति तालफलेनोपमितौ ॥७२॥

अथ मुहुर्बहुनिन्दितचन्द्रया स्तुतविधुंतुदया च तया मुहुः ।
पतितया स्मरतापमये गदे निजगदेऽश्रुविप्लुतमुखी सखी ॥७३॥

अनन्तरं भैम्या पुनः पुनर्गर्हितनिशाधवया पुनः पुनः श्लाघितसिंहिकासुतया च नयनजलप्लावितास्या वयस्या निगदिता । कीदृश्या ? कामज्वररूपे व्याधौ मग्नया ॥७३॥

नरसुराब्जभुवामिव यावता भवति यस्य युगं यदनेहसा ।
विरहिणामपि तद्दृतवधुक्षणमिति न कथं गणितागमे ॥७४॥

कथं तया सखी निगदिता तद्दर्शयति । हे सखि ! गणितागमे ज्योतिःशास्त्रे ब्रह्मसिद्धान्तादौ विरहिणामपि युगं कृतत्रेतादिप्रसिद्धं कथं न, कस्मात् हेतोर्नास्ति । केषामिव ? नरसुराब्जभुवामिव । नराश्च सुराश्च अब्जभुवश्च तेषामिव । मनुष्यदेवब्रह्मणां यथा युगानि तत्र विविधं प्रदर्शितानि तथा विरहिणामपि कथं न युगं दर्शित-मित्यर्थः । ननु तेषां कियत् प्रमाणमस्तीत्यत्याह । यस्य विरहिणो नरस्य सुरस्या-ब्जभुवो वा यावता यावत्प्रमाणेन यस्यानेहसा कालेन यस्य भवति घटते नरस्य

1. ह. स्वेषा ये –

विरहिणस्तस्यैव प्रमाणेन भवतु सुरस्य सुरस्यैव ब्रह्मणो ब्रह्मण एव तेऽपि हि [१५.७]. ययोऽपि विरहिणः सम्भवन्त्येव। प्रकृत्यवस्थायां यथा तेषां सङ्ख्यानपुरःसरं युगमुक्तमेवं विरहावस्थायामपि वक्तुं युक्तम्। ननु युग-गणनाक्षणादारभ्यस्तत्र क्षणः प्रसिद्धस्त्रिंशत्कलस्तस्मादेव विरहियुगस्यापि गणना भवतु क्षणान्तरेण चेत्याशङ्क्याह। कीदृशं विरहिणां युगम्। तद्गतवद्ध्रुव-क्षणमितं तेषां नरसुराब्जभुवां रतवन्तौ[1] निधुवनानन्दमग्नौ यौ युवानौ, युवा च युवती च, तयोर्यः क्षणस्त्रिंशत्कलः कालांशभेदस्तेन मितं गणितम्। विर-हिणां हि प्रसिद्धक्षणो वर्षशतप्रमाणो भवेत्[2]। दुरतिवाह्यत्वात्[3]। सुरतरसनिम-ग्नयोस्तु यूनोर्युगसहस्रमप्यविदितगतत्वात् क्षण इव भवति। तथा चोक्तं कुमारसम्भवे-'समदिवसनिशीथं संगिनस्तत्र शम्भोः शतमगमदृतूनां साग्रमेका निशेव' इति। [ ] एतस्य वाक्यस्य पौर्वापर्यपर्यालोचनेन विरहियुगस्य ब्रह्मयुगपरार्धादप्याधिक्यं भवति। अन्यदपि सहृदयैर्विशेषभूतं वस्त्वत्र प्रकटीकृत्य निकटीकर्तव्यं श्रोत्रयोः[4] शिष्याणामिति ॥२४॥.

जनुरधत्त सती स्मरतापिता हिमवतो न तु तन्महिमादृता।
ज्वलति भालतले लिखितः सतीविरह एव हरस्य न लोचनम् ॥२५॥.

सती दक्षतनया पत्युर्विरहात् स्मरेणैव तापिता सती हिमवतः सकाशाज्जनु-र्जन्माधत्त दधे[5]। न पुनस्तस्य हिमवतो यो महिमा प्रभावो नगाधिराजत्वरत्नो-त्पत्तिरवनित्वादिलक्षणस्तत्रादृता यत्नवती सती। पुराणे हि पित्रपमानिता सती, सती पुण्यसरीत् तीरे योगेन देहमुत्सृज्य हिमालयस्यालये विविधभूतिमति तज्जाया-यां मेनायां सम्बभूवेति गर्भितो महत्त्वमेव हेतुरुक्तः। तच्च न तथा।

---

1. B1. रमन्तौ. 2. B1. भवते. 8 भवति. 3. B1. -वाह्यत्वात्. 4. B1. श्रोतयोः 5. B1, D. दधे.

किन्तु हिमस्तुषाराख्यः पदार्थो विद्यते यस्मिन्निति हिमवानिति नाम्न एव यौगिकत्वमङ्गीकृत्य विरहज्वरदाहशान्तिमनुसन्धाय तत्राऽऽयत। किञ्च। हरस्य सतीपतेर्ललाटान्तर्लिखितः स्वलितिस्थिरीभूतो मूर्तिमान् सत्या सह यो विरहः स एव आज्ज्वल्यते। न पुनर्लोचनं तृतीयं नेत्रमेतदिति यज्जगति प्रसिद्धमिति। इदं सतीहरविरहाख्यानं तु शिवपुराणादौ। अत्रापह्नुतिरलङ्कारः ॥७५॥

दहनजा न पृथुर्दवथुर्व्यथा विरहजैव पृथुर्यदि नेदृशम्।

दहनमाशु विशन्ति कथं स्त्रियः प्रियमपासुमुपासितुमुद्धुराः ॥७६॥

हे सखि! बहिर्दृष्टयो जना विरहजतापव्यथातो दहनजां तापव्यथामधिक-
-तराभाहुः। परं दहनजा दवथोरूपतापस्य व्यथा पीडा न पृथुर्न भूयसी, किन्तु विरहादेव जाता दव-[१८-a]-थोर्व्यथा पृथुः। कथमेवं प्रतिजानीते भवतीत्याह। यदि नेदृशं यद्ययमर्थ ईदृशो न भवेत् तर्हि स्त्रियः सत्यो नार्योऽपासुं गतप्राणं प्रियं प्राणनाथमुपासितुमुपस्थातुमुद्धुरा उत्कण्ठिताः सत्य आशु शीघ्रमेव दहनं कथं विशन्ति, केन प्रकारेण चिताऽर्चिषि सञ्चरन्ति। तस्माद्यदि विरहदाहात् दहनदाहो[1] दुःसहस्तत एता एवमाचरन्ति। एता वरमग्नेः सन्तापस्य व्यथां सहन्ते, न तु विरहस्येति ॥७६॥

हृदि लुठन्ति कला नितराममूर्विरहिणीवधपङ्ककलङ्किताः।

कुमुदसख्यकृतस्तु बहिष्कृताः सखि! विलोकय दुर्विनयं विधोः ॥७७॥

हे सखि! चन्द्रस्य विरुद्धाचरणमवलोकय। कोऽसौ दुर्विनयस्तं दर्शयति। अनेन विधुना विरहिणीवधाद्यः पङ्कः पापं तेन कलङ्किता लग्नापवाद-
-कालिकायाः कला अंशास्ता हृदये विलसन्ति, अर्थात् विधोरेव। काष्र्ण्येरेव-
-मनुमितं यदेताः कलाः पातकैरेव कृष्णाः पातकं च हत्यानिमित्तं महीयः।

1. ख. विरहदाहो दुःसहः.

हृत्या च ह्रिया महीयसी। ततोऽपि महीयसी खलु तस्या आपत्पतितायाः।
तस्याश्च विरहादधिका सैवान्यापत्। स च विरहिणीनां शतं हतवान् ध्रुवं च
दृश्यते। तु पुनः कुमुदैः सह या सख्यस्य सौहृदस्य कृतो विधात्यस्ता बहिः-
-कृता विश्लेषिताः। सिता हि कुमुदानां सितानां सख्यः सुहृद्भूताः। तत्त्वतस्तु
सितिमैव कुमुदानां साम्यम्। कलङ्कितास्तु कलङ्कीभूताश्चिह्नरूपतां प्राप्ता इत्यर्थः।
अन्योऽपि दुर्विनीतो यः पुमांस्तस्य पापिन अन्तराः पुण्यवतस्तु दूरीकृता दृश्यन्ते॥७७॥

अयि! विधुं परिपृच्छ गुरोः कुतः स्फुटमशिक्ष्यत दाहवदान्यता।
ग्लपितशम्भुगलाद्गरलात्त्वया किमुदधौ जड! वा वडवानलात्॥७८॥

अयि! अङ्गसखि, चन्द्रमनुयुङ्क्ष्व। किं पृच्छामीत्याह। हे विधो! स्फुटमधिकं
सम्यग् दाहवदान्यता ज्वालनस्थूलदातृता कस्माद् गुरोराचार्यादशिक्ष्यत शिक्षितेति।
किं समुद्रे वर्तमानाद् गरलाद् विषादथवा वडवानलात्। गरलात् कीदृशात्।
ग्लपितो विच्छायीकृतः शम्भोर्गलो येन तस्मात्। सामान्येनाहं जानामि दाहदान-
-शक्तिस्त्वया बालेन क्षीरनीरनिधौ वर्तमानेन सांनिध्याद् गरलवडवानलयोरन्य-
-तरस्माद् यथावदभ्यस्तेति। विशेषे तु संशयः कतरस्मादिति तं च विशेषं विधुं
पृच्छ। पृच्छेत्यस्य कर्मता वाक्यार्थस्यैव। वडवानलस्य दाहशक्तिः प्रसिद्धा गरलस्य
तु कर्मणा प्रदर्शिता॥७८॥

अयमयोगिवधूवधपातकैर्भ्रमिमवाप्य दिवः खलु पात्यते।
शितिनिशादृषदि स्फुटदुत्पतत्कणगणाधिकतारकिताम्बरः॥७९॥

खलु नूनमयं चन्द्रो दिवः सकाशात् पात्यते। कैः? विरहिस्त्रीघातपा-[१८.७]-
-तकैः। किं कृत्वा? भ्रमिमवाप्य भ्रमयित्वा। क्व पात्यते? कृष्णरात्रिशिलायाम्।
अत एव कीदृशः? स्फुटतः सकाशात् स्फुटन्तो वोत्पतन्त उड्डीयमाना ये कणानां

गणाः पुञ्जास्तैरेवाधिकं यथा स्यादेवं तारकितं सञ्जाततारकीकृतमम्बरं खं येन सः। चन्द्रस्य भ्रमणं दृश्यत एव। ताराश्च श्वेता विधुश्च न दृश्यते कृष्णायां निशि तदियं सम्भावना। अन्योऽपि सितस्तुषारपिण्डादिर्भ्रमयित्वा यदि केनाप्याकाशाच्छि-न्नायां पात्यते ततस्तच्छकलैरुत्पतद्भिस्तत् समीपभूप्रदेशः परितो निचीयते। ताराः सञ्जाता यत्र तत् तारकितम्। अत एव दर्शनात् सञ्जातेऽर्थे इतच् ॥४९॥

त्वमभिधेहि विधुं सखि! मद्गिरा किमिदमीदृगधिक्रियते त्वया।

न गणितं यदि जन्म पयोनिधौ हरशिरःस्थितिभूरपि विस्मृता ॥५०॥

हे सखि! त्वं मम वाचा चन्द्रं ब्रूहि। यत् हे विधो! त्वया इदमीदृक् पूर्वोक्तं त्वया किमित्यधिक्रियते समाश्रीयते। काक्वा अपि तु तवायमधिकारः कर्तुं न युज्यत एवेत्यर्थः। किञ्चान्यज्जन्मभाजो ब्रूहि। त्वं तावद् दुग्धाब्धेरुत्पन्नोऽसि, तदपि पयोनिधौ जन्म निजं त्वया न गणितमपेक्षितम्। पुंसा हि निजकुलानुसारेण व्यवहर्तव्यम्। तच्च त्वया पृष्ठस्य पश्चात् क्षिप्तमेव किलैवं विचेष्टमानेन, भवतु। तच्चेन्न गणितं, तर्हि हरस्य शिरसि या स्थितिर्निवासः साऽपि विस्मृता निवासभूमेरप्यनु-सारेण नरेण वर्तितव्यं तदपि तव न दृश्यते। हरशिरःस्थितेश्च सद्गुणसामग्री गङ्गादिसङ्गात् प्रसिद्धैव। अत्रापि वाक्यार्थस्यैव कर्मता ॥५०॥

निपततापि न मन्दरभूभृता त्वमुदधौ शशलाञ्छन! चूर्णितः।

अपि मुनेर्जठरार्चिषि जीर्णतां बत गतोऽसि न पीतपयोनिधेः ॥५१॥

रे शशलाञ्छन! कलङ्किन्! उदधौ निपतता सता त्वं मन्दरगिरिणाऽपि न चूर्णीकृतः कणिकाभावं नीतः। तस्य तत्र पतनावसरे त्वमप्यधस्तात् संनिहितो-ऽभूस्ततस्तव चूर्णीभवनं युक्तं, तदपि ते नाभूदिति काकुगर्भं वाक्यम्। अथवा पीतसमुद्रस्य मुनेरगस्त्यस्य वातापिभक्षयितुर्जठराग्निज्वालासु त्वं जीर्णतां परिणामं

भस्मीभावमप्यहह न गतोऽस्यत्रापि काव्यार्थः। यद्वा ह्यगस्त्यमुनिना समुद्रः पीत-
-स्तदा चन्द्रस्तदन्तस्थोऽभूत्ततोऽस्य जाठराग्नौ परिपाको युक्तः। तदपि न जातम्।
तस्य च मुनेर्जठरपिठरवह्नेः परिणमनशक्तिर्लौकिकैरेव भोजनावसाने गुरुतराहारस्य
परिणामाय तुन्दमार्जनपुरःसरं स्मरणं कुर्वद्भिः [११.८] समाख्याता ॥५१॥

किमसुभिर्ग्लपितैर्जड ! मन्यसे मयि निमज्जतु भीमसुतामनः।

मम किल श्रुतिमाह तदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः ॥५२॥

रे जड! मूर्ख, अथ च जडजलमयग्लपितैः सन्तप्तैरसुभिः[1] कृत्वा दमयन्तीमनः
कर्तृ मयि विषये निमज्जतु बुडत्विति किं मन्यसे सम्भावयसि। काक्वा वृथैव
ते सम्भावनेयमित्यर्थः। ननु त्वयि पञ्चतामापन्नायामवश्यं तव मनसाऽगत्य
मयि मज्जितव्यमेव। 'चन्द्रं वै मनः' [ ] इति श्रुतिवाक्येन पाञ्च-
-भौतिकस्य देहस्य पञ्चसु भूतेषु यथायथं सङ्क्रान्तेषु सत्सु मनसः सङ्क्रम-
-णस्य चन्द्रमस्युक्तत्वात् श्रुतिवाक्यं च न मिथ्येत्याह। सत्यमेव श्रुतिवाक्यं,
किन्तु किलेत्याप्तोक्तौ विबुधः पण्डितः स्मरः कामस्तदर्थिकां[2], सोऽर्थो यस्याः
सा तदर्थिका तां नलमुखेन्दुपरामाह। व्याख्याति। अन्येषां कालधर्मं प्राप्तानां
मनश्चन्द्रं दिवि वर्तमानं यातु। दमयन्त्यास्तु गता सोर्नलमुखरूपं चन्द्रं यास्यतीति।
कामेन पण्डितेन वेदवाक्यस्य विषयविभागः कृतोऽस्ति। त्वं च रे जडो मूर्खः।
सामान्यवाक्यानामप्यर्थावगमने न समर्थः, किं पुनर्वेदवाक्यानाम्। तत्त्वतस्तु
विबुधो देवस्तेन च तथा चिन्तितमस्ति। यथाऽमृताया अपि दमयन्त्या मनो
नलमेव नयति। देवानां च चिन्तितं न मृषा। विशिष्टो बुधो विबुधः। जडशब्देन
जलमपि, तत्र च निमज्जनं भवत्येव ॥५२॥

---

1. ग्री· सप्तै – 2. ह· तदर्थिको·

[1] मुखरस्य स्वयशोनवडिण्डिमं जलनिधेः कुलमुज्ज्वलयाऽधुना ।

अपि गृहाण वधूवधपौरुषं हरिणलाञ्छन ! मुञ्च कदर्थनाम् ॥५३॥

मां परं व्यापाद्य न पुनरेवं व्यथयेति वाक्यार्थः। स्वस्य यशस्तस्य नव-मपूर्वं डिण्डिमाख्यं वाद्यं मुखरस्य वाचालस्योच्चैः शब्दापय। [2] जलानां निन्द्यानां मूर्खाणां यो निधिस्तस्यान्वयमिदानीं निर्मलय। स्त्रीघातपातकमप्याहरस्व, तथापि मम कदर्थनां बहुविधां बाधां रे रंकुकलङ्क ! त्यज। पूर्वार्धे स्तुतिनिन्दामुखेनो-ल्लुण्ठनम्। जलनिधेरिति छलोक्तिः। डिण्डिमस्य नवत्वमीदृशे कर्मणि तस्य पूर्वमनुपलब्धत्वात् ॥५३॥

निशि शशिन् ! भज कैतवभानुतामसति भास्वति तापय पाप ! माम् ।

अहमहन्यवलोकयितास्मि ते पुनरहर्पतिनिर्धुतदर्पताम् ॥५४॥

रे मृगाङ्क ! रात्रौ मायासूर्यत्वं समाश्रय। सूर्ये चाविद्यमाने रे पापिन् ! मां ज्वलय। अहं पुनस्तव दिजनाथप्रोषितगर्वत्वं द्रक्ष्यामीति निजाशक्तौ [3] शत्रो-स्तस्य शक्तिमतः शत्रोरुपन्यासो लोकोक्त्याश्रयणेन ॥५४॥

शशकलङ्क ! भयङ्कर मादृशां ज्वलसि यन्निशि भूतपतिं श्रितः।

तदमृतस्य तवेदशभूतता द्भुतकरी परमूर्धविधूननी ॥५५॥

---

1. D. om. मुखरस्य .......... व्यथयेति वाक्यार्थः।
2. D. om. निन्द्यानां .......... मुखेनोल्लुण्ठनम्।
3. D. रात्रौ.

रे शशकलङ्क! मादृशां विरहिणीनामबलानां भयङ्कर भयकारक यस्त्वं निशि रात्रौ भूतानां देवयोनीनां पतिं स्वामिनं मुख्यं भूतं शिवोऽनुगतः सन्, यस्त्वं ज्वलसि, वह्निरेव भूत्वा दीप्यसे, ततस्तवेदृशी चासौ भूतता चाद्भुतकरी आश्चर्य--जननी परेषामाविष्टानां मू-[११.६]-र्ध्नो विधू नयत्युद्भ्रमयतीति परमूर्ध--विधूननी। कीदृशस्य? अमृतस्य जीवित एव। न हि जीवन् क्वापि भूतीभवन् दृष्टः। त्वं च तथा दृश्यसे भूतकर्मणां सर्वेषां दृश्यमानत्वात्। तत्त्वतस्तु तवामृतस्य पीयूषमूर्तेरीदृशभूतता एवंभाविता चित्रकरी परेषां वीक्षकाणामाश्चर्या--न्मूर्धानं धूनयति या। यतस्त्वं भूतपतिं शिवं समाश्रितः सन्, निशि ज्वल--त्यूष्माणमुद्वमसि मादृशां[1] च भयं जनयसि। अन्या तव सामग्री सर्वा सौम्या दृश्यते। अयं[2] तव विरुद्धम्। यन्मादृशां, भयं करणं, ज्वलनं शशकलङ्कत्वं च ॥५५॥

श्रवणपूरतमालदलाङ्कुरं शशिकुरङ्गमुखे सखि! निक्षिप।

किमपि तुन्दिलितः स्थगयत्ययं सपदि तेन तदुच्छ्वसिमि क्षणम् ॥५६॥

सखि! चन्द्रहरिणास्ये कर्णाभरणीभूतं तमालदलाङ्कुरं न्यस्य। ननु किमेवं स्यादित्याह। तेन मुखप्रक्षिप्तेन भक्षितेन तमालदलाङ्कुरेण तुन्दिलितस्तुन्दीकृतः सन् शशिकुरङ्गः किमपि मनागिव ययमुं शशिनं स्थगयति छादयति तत्त्वतः क्षणमात्रमहमुच्छ्वसिमि संवाहनां प्राप्नोमि निर्वृता भवामीति विरह--विभ्रमादृतात्त्विकी प्रवृत्तिः। एवमन्यत्र तमालस्य तापिच्छस्य[3] दलमिश्रोऽङ्कुरः। दलानामङ्कुरो नयोर्भेदो वाचालः प्रवाल एव वा तमालस्य। तुन्दिलितस्तुन्दिलः कृतः। 'सर्वनाम्नानुसन्धिर्वृत्तिच्छन्नस्य' इति न्यायादमुमिति सर्वनाम्ना सह शशि--शब्दस्य समासस्थस्याप्यनुसंधानम् ॥५६॥

---

1. B. सादृश्यं. 2. B. तस्या. 3. B. om. तापिच्छस्य ---- तुन्दिलः कृतः।

असमये मतिरुन्मिषति ध्रुवं करगतैव गता यदियं कुहूः।

पुनरुपैति निरुध्य निवास्यते सखि ! मुखं न विधोः पुनरीक्ष्यते ॥५७॥

हे सखि! निश्चितमकाले बुद्धिरुत्पद्यते । कथं ज्ञायत इत्याह। यत्कारणादियं कुहू-रमावस्या करगतैव गता स्वाधीनैव दूरीभूता । यदि हि तस्यां निकटस्थायां बुद्धि-रुदपश्यत, तदाहमेनां यातुं नादास्याम। तस्यां च सन्निहितायां कुतः शशिनो भयम । हे सखि! यदि दैवात् पुनर्भूय औत्युपगच्छति, तदा निरुध्य संस्तभ्य निवास्यते स्थाप्यते । नन्वेवं सति किं स्यादित्याह। विधोर्मुखं पुनर्न दृश्यते। तस्यां सततं समीपावस्थितायां सत्यां चन्द्रस्य [१६०a] सत्त्वैव न भवति। पुनरुपैतीत्यादिवाक्यत्रयस्यार्थः प्रत्येकं स्वप्रधान एव काकुगर्भः स पुनरनुभवगम्यः॥५७॥

~~अयि~~ अपि ! ममैष चकोरशिशुर्मुनेर्व्रजति सिन्धुपिबस्य न शिष्यताम ।

अशितुमब्धिमधीतवतोऽस्य वा शशिकराः पिबतः कति शीकराः ॥५८॥

हे सखि! एष मम चकोरस्य शिशुरपि सिन्धुपिबस्य मुनेरगस्त्यस्य शिष्यतां विद्यार्थितां न व्रजति । नकारोऽत्र सम्भावनापूर्वविधौ न तु निषेधे विधिश्च काक्वैव भङ्गिविशेषतया । अयं हि बालः सिन्धुपिबश्च मुनिरिति गुरुशिष्ययोः समञ्जसत्वमुक्तम। 'सिन्धुपिबस्य' इति साभिप्रायम। बाले च यद्यदुपदिश्यते, तत् तत् तत्र वज्रलेपीभवति । सद्गुरुश्च शिशोः पुण्यादेव लभ्यते। ननु चेदयं भूतस्तच्छिष्यस्ततः किं स्यादित्याह। वा अथवा । अस्य चकोरशिशोरस्मान्मुनेः समुद्रं पातुं कृताभ्यासस्य पिबतः सतः शशिनो रश्मयः कत्यम्बुकणा भवन्ति। अपि तु स हेलयैव चन्द्रं पिबतीत्यर्थः। वाशब्दः पूर्वार्थापेक्षया पक्षान्तरे हेत्वर्थे वा। शशिकराणां संबन्धित्वमेव विवक्षितम । न तु कर्मत्वम। 'अपि' सम्भावने, एतदपि सम्भव-तीत्यर्थः। 'अयि' इति पाठे वा तदा नकार एव सम्भावनार्थः ॥५८॥

कुरु करे गुरुमेकमयोघनं बहिरितो मुकुरं च कुरुष्व मे।
विशति तत्र यदैव विधुस्तदा सखि! सुखादहितं जहि तं द्रुतम्॥५९॥

हे सखि! एकं महान्तं लोहमुद्गरं हस्ते गृहाण इतो मे बहिर्मम दूरदेशे दर्पणं च सज्जय। ननु ततः किमित्याह। तत्र मुकुरे यदैव चन्द्रः प्रविशति, सञ्चरति, तदैव स्वाधीनत्वादनायासेनैव झटिति चूर्णय। यतोऽहितमनुपकारिणम्। इतो मे बहिरिति घनहननोत्पतितस्फुलिङ्गसङ्गशङ्कया दूरदेशस्थापनम्॥५९॥

उदर एव धृतः किमुदन्वता न विषमो वडवानलवद्विधुः।
विषवदुज्झितमप्यमुना न स स्मरहरः किममुं बुभुजे विभुः॥६०॥

उदन्वता समुद्रेण विधुश्चन्द्र उदरे मध्य एव किमु न धृतः। किंवद्? वडवानलवत्। यतोऽयं विषमो दाहकत्वाद् दुःसहो दुःखदो वा। वडवानलो हि विषम-त्वात् समुद्रेणोदर एव धृतोऽयमपि तत्तुल्य एव। अस्योद्धरणे सिन्धोः को हेतुः। अथवा स भगवान् स्मरहरः स्वामी शम्भुरमुं विधुं किं न बुभुजे कस्मान्न गिलति स्म। कीदृशममुं अमुना उदन्वता विषवदुज्झितं निष्कासितमपि। यथाऽब्धिना विषमत्वाद्विषमुज्झितं, तथाऽयमपि विषमत्वादेवोज्झितः। विषं मातीति विषम इति विशेषणस्य सद्भावात्। विषं समुद्रेण विषमत्वादेवोज्झितम्। [९४.७] कारुणिकेन भगवतैतत् कृतं लोकबाधां शङ्कमानेन शङ्करेण भक्षितं, रक्षितमेतत् चन्द्रमथमुपविषं तेन केन हेतुना न जानामीत्यर्थः॥६०॥

असितमेकसुराशितमप्यभून्न पुनरेष पुनर्विशदं विषम्।
अपि निपीय सुरैर्जनितक्षयं स्वयमुदेति पुनर्नवमार्णवम्॥६१॥

असितं कृष्णमार्णवमर्णवभवं विषमेकेनापि सुरेण भगवता भवेनाशितं भक्षितं सत् पुनर्भूयो नाभूत् सद्भावमाप एष पुनश्चन्द्रः। साक्षाद्विशदं विषं सुरैर्देवैर्यथा

यथा निपीय भुक्त्वा जनितक्षयं विहितविनाशमपि पुनर्नवं भूयो नूतनदेहं भूत्वैवोदेत्युत्पद्यते, तस्मात् कृष्णविधारस्य [1]शक्त्या मह[2]दन्तरमिति भावः। अर्णवजन्मतया तु द्वयोः साम्यम्। पुनर्नवमिति नित्यसमासः। णत्वं तु क्वचिदपि दृश्यते ॥६१॥

विरहिवर्गवधव्यसनाकुलं कलय पापमशेषकलं विधुम्।

सुरनिपीतसुधाकमपापकं गुरुविदो विपरीतकथाः कथम् ॥६२॥

हे सखि! अशेषकलं पूर्णं विधुं पापं कुत्सितं हेयं कलय जानीहि। सुरै-
-र्निपीता सुधा यस्येति सुरनिपीतसुधाकमपापकं श्लाघ्यमुपादेयं कलय। ननु
द्वितीयस्य परार्थे क्षीणत्वात् पुण्यदेहत्वमुचितम्। प्रथमस्य कथं पापमूर्तित्वमिति
हेतुगर्भं विशेषणमाह। वियोगिजातघातव्यसनेनाकुलमुत्सुकमिति। अयं हि वियोगि-
-सार्थयोधनव्यसनोत्सुकः। एवं सति गुरुविदो ज्योतिरागममर्मज्ञाः कथं विपरीत-
-कथाः प्रतीपं किमिति ते कथयन्ति। आगमाद्धि प्रत्यक्षं बलीयः। ज्योतिःशास्त्रे
[3]ह्यापूर्यमाणश्चन्द्रः पावनत्वात् शुभकर्मसु प्रशस्त उक्तः। क्षीयमाणस्त्वप्रशस्तः।
एतदेव च वैपरीत्यम् ॥६२॥

विरहिभिर्बहुमानमवापि यः स बहुलः खलु पक्ष इहाजनि।

तदमितिः सकलैरपि यत्र तैर्व्यरचि सा च तिथिः किममीकृता ॥६३॥

हे सखि! खलु नूनमिह जगति स पक्षो मासार्धांशो बहुलो बहुलनामा [अजनि] जातः, जनितः कृतो वा। स क इत्याह। यो विरहिभिर्बहुमानमधिकं प्रमाणमवापितः। यच्च वस्तु स्वल्पप्रमाणं [4]सबहु प्रभूतं प्रमाणमवाप्नोति, तद् बहुलं प्रभूतं भवत्येव। एवं सान्वया खल्वियं कृष्णपक्षस्य संज्ञेत्यर्थः। तत्त्वतस्तु बहुमानमधिकसत्कारमिति। यो हि सत्क्रियते, स कृशोऽपि मलिनोऽपि सर्वचेष्टितेन बहुलः सकारो भवति।

---

1. B1. शक्त्वा· 2. B. -आतिधाति- 3. B1. धा- 4. B. सद्बहु.

किञ्च सैव तिथिः किममीकृता वर्तते। सा केत्याह। यत्र तिथौ तैः सकलैर्विरहिभिः सम्भूय तस्य मानस्य प्रमाणस्यामितिरपरिच्छेदोऽनियत्ता कृता। न विद्यते [११.a] मा प्रमाणं यस्यां सा अमा अनमा अमाकृता अमीकृता। तत्त्वतस्तु अमाशब्देनामावास्या। बहुलो हि कृष्णपक्षो रुच्यैव। अमात्यमावास्या चन्द्रसूर्ययोगविशेषात्। विरहिभ्यश्च[1] कृष्णपक्षो रोचते चन्द्रक्षयहेतुत्वात्। अमावास्या तु नितान्तं रोचते, सर्वथा चन्द्राभाव-कारित्वात्। चन्द्रश्च विरहिणां विरोधी वर्तत एव प्रसिद्धः। सत्कारव्याख्यापक्षोऽप्यत्रा-वतारणीयः। अमीकृता अमास्वरूपतां प्रापिता किं सैव तिथिर्वर्तत इति व्याख्येयम्। अत्र व्याख्याने तिथिरनूद्या अमीकृतेति विधेयम्। पूर्वव्याख्यानेऽप्ययमेवार्थः। केवलं वचनभङ्गिः॥ ॥६३॥

स्वरिपुतीक्ष्णसुदर्शनविभ्रमात्किमु विधुं ग्रसते स विधुंतुदः।
निपतितं वदने कथमन्यथा बलिकरम्भनिभं निजमुज्झति ॥६४॥

स्वस्य रिपुर्विष्णुस्तस्य तीक्ष्णः कृतो योऽसौ सुदर्शनो ज्वालाकरालं चक्रं तस्य विभ्रमाद् विशङ्कावशात् किमु स विधुंतुदो राहुर्विधुं चन्द्रमसं ग्रसते। काक्वा अपि तु सुदर्शनभ्रमेणैव राहुश्चन्द्रं गिलति[2]। कथमेवं ज्ञायत इत्याह। अन्यथा यद्येवं न भवेत् तत्कथं बलिकरम्भनिभं पूजानिवेदितदधिभक्तसदृशं वदने निपतितं मुखप्रविष्टमत एव निजमात्मीयमुज्झति क्षिपति उद्गिलति। अर्थाद् विधुंतुद एव कर्ता ॥६४॥

वदनगर्भगतं न निजेच्छया शशिनमुज्झति राहुरसंशयम्।
अशित एव गलत्ययमत्ययं सखि! विना गलनालबिलाध्वना ॥६५॥

हे सखि! निश्चितं मुखमध्यप्रविष्टं चन्द्रं राहुः स्वाभिलाषेण न मुञ्चति, किन्तु भक्षित मात्र एव सन्नेष कण्ठनलकच्छिद्रमार्गेणात्ययं विनाशं विनैव गलति, च्यवते[3] निःसृत्य पततीत्यर्थः ॥६५॥

सरजुदशः कथयन्ति पुराविदो मधुजितं किल राहुशिरश्छिदम्।
विरहिमूर्धभिदं निगदन्ति न क्व नु शशी यदि तज्जठरानलः ॥६६॥

सरलदृष्टयः पौराणिका विष्णुं राहुशिरश्छेदिनं[4] वदन्ति, वियोगिमस्तककर्तकं न वदन्ति। परमार्थतो हि तेन वियोगिनामेव शिरांसि छिन्नानि। कार्यकारणयो-रभेदान्मृत्युरतिशयवती व्यथा शिरश्छेदनमेव। ननु काऽसौ परम्परा सूक्ष्मार्थस्य यत्ताऽयमर्थस्तद्दर्शयति। पश्य तस्य राहोर्यदि जठरवह्निर्भवेत्, तदा तु भोः शशी क्व स्यात्।

1. B1. विरहिन्यः 2. [illegible] गिलति. 3. B. वच्यते. 4. B1. च्छिदिनं.

जठरज्वलने सति मद् गिलितस्य चन्द्रस्य भस्मीभूतत्वात् सद्भाव एव न भवेत् ।
ततः कुतो विरहिणां तत् कृता बाधा ॥६६॥

स्मरसखौ रुचिभिः स्मरवैरिणा मखमृगस्य यथा दलितं शिरः ।

सपदि संदधतुर्भिषजौ दिवः सखि ! तथा तमसोऽपि करोतु कः ॥६७॥

हे सखि ! दिवो भिषजौ स्वर्वैद्यावश्विनीकुमारौ रुचिभिः कान्तिभिः कृत्वा स्म-[११.८]-रस्य कामस्य सखायौ सुहृदावत एव स्मरस्य वैरिणा त्रिनेत्रेण दलितं कृत्तं सन्मखमृगस्य यज्ञहरिणस्य शिरो मूर्धानं सपदि तत्क्षणसमन्-न्तरमेव यथा येन विधिना संदधतुर्योजितवन्तौ, तथा तद्वत् संविधानं तमसो राहोरपि कः करोतु । काक्वा अपि तु तादृशस्य कर्ता कोऽपि नास्तीत्यर्थः । द्वौ कामस्य सखायौ भगवान् भवानीपतिश्च कामस्य शत्रुः, मित्रेण मित्रस्य कार्यं कर्तव्यं, तस्य चैतदेव महत्कार्यं यत् तच्छत्रोरपकारः । इतिहासोऽयं पुराणे ॥६७॥

गलविमस्तकितस्य रणे रिपोर्मिलति किं न कबन्धगलेन वा ।

धृतिभिया भृशमुत्पततस्तमोग्रहशिरस्तदसृग्दृढबन्धनम् ॥६८॥

तमोरूपस्य ग्रहस्य राहोः शिरो मूर्धा कबन्धस्य गलेन कण्ठेन सह किं वा न मिलति । काक्वा नाम्नापि यदि मेल्यते, तदा मिलतीत्यर्थः । कस्य कबन्ध-गलेनेत्याह । रणे गलेन विमस्तकितस्य मस्तकरहितीकृतस्य सङ्ग्रामे गलेन यस्य मूर्धा लूनस्तस्येत्यर्थः । किं कुर्वतो रिपोः ? भृशमुत्पतत उच्चैस्तरामुत्पततः । कया ? धृतिभिया ग्रहणभयेन । कीदृक् तमोग्रहशिरः । तस्य कबन्धगलस्य सद्यो निर्गतत्वात् तप्तेनासृजा रुधिरेण दृढं गाढं बन्धनं लग्नं यस्य तत् तथा । स च ग्रहो वर्तत एव गृह्णातीति कृत्वा । स दूरादपि गृह्णाति । किं पुनः समीपमुपागतम् ? दैवे लग्नं तु किं कथ्यते । तद् गृह्णात्येव । अन्यथा एकस्यैकस्यैव रक्तेन दृढबन्धनं न स्यात् ।

राहोः शिरसश्चिरकालकृत्तस्य तत्परवत्तस्यासम्भवात्। अप्रस्तुतजल्पनेन नलो विस्मृत एव स्यादिति व्याजेन तदुद्बोधनम् ॥६८॥

सखि! जरां परिपृच्छ तमःशिरः सममसौ दधतापि कबन्धताम्।
मगधराजवपुर्दलयुग्मवत्किमिति न व्यतिसीव्यति केतुना ॥६९॥

हे सखि! जरां नाम राक्षसीं परिपृच्छ यदसौ जरा तमःशिरो राहुमूर्धानं केतुनाम्ना ग्रहेण कबन्धरूपं धारयताऽपि सह किमिति कस्माद्धेतो विनिमयेन यथायुक्ति संयोज्य परस्परं न सीव्यति सूच्यानध्वानेनं ग्रथ्नाति। किंवत्। मगधदेशस्य राजा जरासंधो नाम, तस्य वपुषो[1] देहस्य दले भित्ते तयोर्युग्मम्। यथा सा पूर्वं व्यतिसीव्यति स्म। जरया संहितत्वाद्धि जरासंधः। कथा चेयं पुराणे। पृच्छेति सामान्येन। द्वितीयं तु कर्म वाक्यार्थ एव ॥६९॥

वद विधुंतुदमालि! मदीरितैस्त्यजसि किं द्विजराजभिया[2] रिपुम्।
किमु दिवं पुनरेति यदीदृशः पतित एव[3] निषेव्य हि वारुणीम् ॥७०॥

हे आलि! मदीरितैर्मद्वचनैर्विधुन्तुदं वद ब्रूहि। यत हे विधुन्तुद! रिपुं [100.a] शत्रुं द्विजराजभिया किं त्यजसि, द्विजराजोऽयमस्य बाधा कर्तुं न योग्येति शङ्कमानः कस्मान्मुञ्चसि। काक्वा अपि त्वनया भ्रान्त्या नायं त्यक्तुं युक्त इत्यर्थः। ननु द्विजमात्रोऽपि न वधार्हः। किं पुनर्द्विजराजस्तस्मात् तद् बाधातो[4] भयं युक्तमेवेत्याह। यद्ययमीदृशो द्विजराजो भवति, तर्हि वारुणीं सुरां निषेव्य सुचिरं पीत्वा पतित एव किमु पुनर्भूयो दिवमेति, स्वर्गं याति। काक्वा अपि तु न गच्छतीत्यर्थः। पतितो ह्यधो नरकमेव याति। पतनमधोगमनं, तेन च नरक उपलक्ष्यते। ऊर्ध्वगत्या तु स्वर्गः। तत्त्वतस्तु वारुणी वरुणदिक्। पतितोऽधोगतो नभसोऽवलम्बितः धोर्गमनम्। अत्रापि वदेत्यस्य कर्मता वाक्यार्थस्यैव ॥७०॥

---

1. Bl. om. hapl. वपुषो देहस्य. 2. B. धिया. 3. B. एष. 4. Bl. वधातो.

दहति कण्ठमयं खलु तेन किं गरुडवद्द्विजवासनयोज्झितः।

प्रकृतिरस्य विधुन्तुद! दाहिका मयि निरागसि का वद विप्रता ॥७१॥

हे विधुन्तुद! तेन हेतुना द्विजवासनया ब्राह्मणश्रद्धया त्वया किमयमुज्झितः। तेन केनेत्याह। येन कारणेनायं गिलितः सन् कण्ठे दहति, गलदाहिकां करोति। किंवत्? गरुडवत्, गरुडेनेव। यथा पूर्वं कण्ठं दहन् सन् नूनमयं ब्राह्मण इति सत्यं मत्वा कश्चिदुज्झितः। तस्मादनया भावनया नायमुज्झितुं युक्तः। ननु यद्ययं ब्राह्मणो न भवति, तत्कथं कण्ठं प्राप्तमात्रस्तं दहतीत्याह। हे विधुन्तुद! अस्य विधोरियं प्रकृतिरेव दाहिका। वह्नेरिव स्वभाव एवायमस्य यद् दहति। न चैवं, तर्हि त्वमेव वद, मयि निरागसि निरपराधायां का विप्रता ब्राह्मणता। अपि त्वपराधरहितायां मयि स्त्रियां ब्रह्मतेजसः शक्तिः प्रकाशयत इति न युक्तमेव वदेति सामान्योपक्रमे। पुरा किल जातमात्र एव गरुडः पितरं कश्यपं मुनिमयाचत– "तात! क्षुधा बलवती मां बाधते, दीयतां मे भोजनम्" इति। ततस्तेन स प्रोक्तो– "गच्छ, वत्सक[1]! समुद्रोपकण्ठे, तत्र निषादानां पुरमस्ति, तत्[2] स्थानात् सर्वानपि तान् भक्षय। किन्तु तत्र ब्राह्मण एको निवसति। निषादधामासक्तः स त्वया यत्नाद्(द्) रक्ष्यः" इति। अथो(थ) गत्वा गरुडः पुनस्तमुवाच–"कथं स मयोपलक्षणीयो न भक्षणीयः[3]" इति। ततो मुनिः प्राह–"यो गलनालप्रविष्टमात्र एव तं दहति, स एव ब्राह्मणः" इति। अथोगत्वा तत्र तान् भक्षयितुं प्रवृत्तेन गरुडेन कण्ठदाहात् प्रज्ञाय स ब्राह्मणः सपद्युद्गीर्णो न तु स तज्जठरानलेन जीर्ण इति ॥७१॥

सकलया कलया किल दंष्ट्रया समवधाय यमाय विनिर्मितः।

विरहिणीगणचर्वणसाधनं विधुरतो द्विजराज इति श्रुतिः ॥७२॥

---

1. B1. वश्यक. 2. B. स्थान. 3. B. रक्षणीय

अन्यथं वेदे द्विजराजः कृत्वा पठ्यते "सोमोऽस्मा- [१००.८]-कं ब्राह्मणानां राजेत्यादि। तत्र का गतिः। एवं सति हि तस्यासत्यत्वप्रसङ्ग इत्याशङ्क्याह। अतो हेतोर्विधुर्सम्बन्धिनी द्विजराज इति श्रुतिः। अतः कुत इत्याह। ब्रह्मणायं विधुर्विनि-मितः सृष्टः। किं वस्तु विरहिणीगणस्य चर्वणमदनं, तस्य साधनमुपकरणम्। कस्मै? यमायान्तकाय। कया कृत्वा? सकलया सम्पूर्णया कलया षोडशांशेन दंष्ट्रयैव। किं कृत्वा? समवधाय एकाग्रतां संयोज्य। एतस्य याः कलास्ता [1]यमस्य दंष्ट्रा एव। किं कृत्वा? सावधानेन विधिना यमाय विरहिणीगणं चर्वि-तुमुपकरणमेतन्निर्मितमस्ति योऽयं विधुः तत एवायं वेदे द्विजराजः पठ्यते। द्विजानां दन्तानां राजा द्विजराजः। वेदवाक्यं च सत्यमेव, परमेवं न तु यथा भवतः सम्भावनेति॥७२॥

स्मरमुखं हरनेत्रहुताशनाज्ज्वलदिदं विधिना चकृषे विधुः।

बहुविधेन वियोगिवधागसा शशमिषादथ कालिकयाङ्कितः॥७३॥

हे सखि! योऽयं विधुरिति प्रसिद्ध इदं स्मरस्यैव मुखं ज्वलद्दीप्यमानं सद्भव-भालनयनानलात् ब्रह्मणा कृष्टं निष्कासितम्। अत एवाद्यापि मनोहररूपमद्यापि च ज्वलदेव दृश्यत इति भावः। ननु तदशेषं विशेषरुचिरमभूदेतत्तु [2]शशलाञ्छनं तन्नैवमित्याह। पश्चात् शशमिषात्लाञ्छनच्छद्मना स कालिकया श्यामिकया चिह्नितो-ऽस्ति। केन? अनेकभेदेन विरहिस्त्रीघातपातकेन। [3]अस्य हि विरहिस्त्रीवधे महद् व्यसनं, ततोऽभ्यधिकं पातकं नास्ति तच्चास्मिन्पतितं सत्, कलङ्कीभूतमुप-लक्ष्यत इत्यर्थः॥७३॥

इति विधेर्विविधोचितविगर्हणं व्यवहितस्य वृथेति विमृश्य सा।

अतितरां दधती विरहज्वरं हृदयभाजमुपालभत स्मरम्॥७४॥

1. B1. om. -स्य. 2. B1. शस- 3. D. अस्या.

सा भैमी एवंभूतां चन्द्रस्य नानाविधवचो निन्दां[1] दूरवर्तित्वान्निष्फलेयमिति विचार्य नितान्तं वियोगतापं वहन्ती सती चित्तस्थितत्वान्निकटस्थं कामं पर्यनुयुयोज ॥७४॥

हृदयमाश्रयसे यदि मामकं ज्वलयसीत्थमनङ्ग! तदेव किम्।
स्वयमपि क्षणदग्धनिजेन्धनः क्व भवितासि हताश! हुताशवत् ॥७५॥

अङ्गानङ्ग (अनङ्ग!) यदि त्वं मदीयं हृदयमाश्रयसे, आधारतां नीत्वा वर्तसे, तर्हि तदेवैवं कस्माद्दग्धुमिच्छसि। भवतु। रे हताश! कुत्सितस्पृह![2] निन्द्य! स्वयमपि क्व भवितासि, कस्मिन् स्थाने स्थास्यसि। भवतो हि हृदयं विहायान्य आश्रयो नास्ति। तच्च ज्वलयन् वर्तस एव। ज्वलनाद्वश्यमस्य नाशस्ततो भवतोऽपि का गतिः। आश्रयविनाशे [ग.घ.] सत्याश्रयिविनाशः सिद्ध एवेति भावः। अमुमेवार्थं दृष्टान्तेन द्रढयति। किंवत्? हुताशवत्। कीदृशः? क्षणेन दग्धं निजमिन्धनं शुष्कदार्वादिदीपनं येन सः। अग्नेः खल्वाश्रय इन्धनं, तस्मिन् दग्धे सत्यग्नेः क्व स्थितिः! आश्रयनाशमनु वह्निरपि यथा नाशं याति, तथा निजाश्रयं मम हृदयं दग्ध्वा त्वयापि नाशं गन्तव्यमेवेत्यर्थः। स्मरस्यापि हृदयमिन्धनं दीपनमेव। हताश इति हता भग्ना आशा यस्येति। तवाशा कदाचिदपि मा पूर्यतामित्यर्थः ॥७५॥

पुरभिदा गमितस्त्वमदृश्यतां त्रिनयनत्वपरिप्लुतिशङ्कया।
स्मर! निरैष्यत कस्यचनापि न त्वयि किमक्षिगते नयनैस्त्रिभिः ॥७६॥

हे स्मर! भगवता पुरभिदा भवदरिणा त्रिनयनत्वपरिप्लुतिशङ्कया त्वमदृश्यताममूर्तत्वं प्रापितः। त्रीणि नयनानि यस्यासौ त्रिनयनस्तस्य भावस्त्रिनयनत्वं, तस्य परिप्लुतिरभावोऽव्यवस्था, तस्य शङ्का भ्रान्तिस्तया। अस्मिन् दृश्ये मम त्रिनेत्रत्वं यास्यतीति हरेण तव देहहरणं कृतम्। ननु मयि दृश्ये सति, त्रिनयनत्वं कथं विनश्यतीत्याह। त्वय्यक्षिगते दृश्ये, अथ च द्रष्टव्ये सति, कस्यचनापि कस्यापि त्रिभिर्नयनैः किं न निरैष्यत, निरगंस्यत[3] इति भावे। अपि त्ववश्यं कस्यापि त्रीणि नेत्राणि निरगमिष्यन्नेवेत्यर्थः। कस्येत्यनेन भगवन्तं भवमेवानुसन्धायोक्तम्। पुरभिदा ज्ञातमयं कामो दृश्यः सन्, त्रीण्यपि नेत्राणि निष्कासयिष्यतीति। अथ चाक्षिणि गते प्रतिष्ठे सति, दुर्निष्काश्यत्वात् द्वयोर्नेत्रयोः का कथा! त्रीण्यपि नेत्राणि निष्काश्यायास्यन्नित्यर्थः[4]।

1. B1. भिन्द्यां. 2. B1. कुत्सित. ङ. कुच्छित. 3. ङ. निरंग— 4. B1. निष्टश्या—

तत्त्वतस्तु अदृश्यत्वं मरणं प्रापितः। अक्षिगतो द्वेष्यः। जीवन् हि द्वेष्यो भवान्। नेत्र-
-नयाकर्षणेऽपि शक्तः। अथवा व्याख्यानान्तरम्।

हे स्मर! त्वं हरेणादृश्यः कृतस्त्रिनेत्रत्वस्य परिप्लुतिरव्यवस्थाबाहुल्यम्। त्वयि हि दृश्येऽवश्यं पञ्चबास्त्रिनेत्रा अभविष्यन्। त्रिनेत्र इव त्रिनेत्राः। लक्ष्म्यादिमदमत्तो हि त्रिनेत्रो भूत्वा व्यवहरन्नस्तीति [1]लोकैरुपचर्यते। बहवो जनास्त्रिनयनास्त्रिनयना मा [2]भवन्तीति त्वममूर्तः कृतः पुरारिणेत्यर्थः। व्याख्यानान्तर सङ्गतिरपि चिन्तनीया। भवेद-
-क्षिगतो द्वेष्यः। अक्षिगतो दृष्टिप्राप्तोऽपि अक्षिप्रविष्टश्चाक्षिगतः ॥७६॥

सहचरोऽसि रतेरिति विश्रुतिस्त्वयि च सत्यपि मे न रतिः कुतः।
अथ न सम्प्रति सङ्गतिरस्ति वामनुमृता न भवन्तमियं किल ॥७७॥

हे स्मर! इति विश्रुतिः प्रसिद्धिर्वर्तते इति कथमित्याह। त्वं रतेः सहचरोऽसीति। भवतो रत्या सहाविनाभावेन वर्तनमिति ख्यातिः। त्व-[101.b]-यि च सत्यार्थात्मयि वर्तमानेऽपि सति, कुतो हेतोर्न रतिः। रतिनिवृत्तिस्त्वद्वृ(-त्तिर्वस्तु-)तस्तु कामजाया। आगमस्य हि प्रत्यक्षतो बाधः। अथवा सम्प्रति वां युवयो, रतेश्च तव च सम्प्रति सङ्गतिः सहचरभावो नास्त्येव। कथमेवं जानाति भवतीत्याह। किलेत्यागमे। एवं श्रूयते। इयं रतिर्न त्वामनुममार ॥७७॥

रतिवियुक्तमनात्मपरज्ञ किं स्वमपि मामिव तापितवानसि।
कथमतापभृतस्तव सङ्गमादितरथा हृदयं मम दह्यते ॥७८॥

यतस्तव सम्प्रति रत्या सह विरहः। हे अनात्मपरज्ञ! रत्या वियुक्तं विरहितं स्वमात्मानमपि त्वं तापितवान् ज्वालितवानसि। कामिव? मामिव। यथा मां वियुक्तां तापयन् वर्तसे। तव हि वियोगे तापनं व्यसनं स्वसन्तापनेऽनात्मपरज्ञत्वं हेतुः। नात्मानं परं च जानाति चिन्तयतीत्यनात्मपरज्ञः। अयमहमयं च पर इति भवान्न वेत्ति। तत्त्वतस्तु स्वपरबलाबलमविचार्य यः प्रवर्तते, स एवमुच्यते। कथं त्वयैवं विदित-
-मित्याह। इतरथा यदि त्वयाऽऽत्मा ज्वालितो न भवेत्, तदा तवातापभृतः सङ्गमात् प्रकृतशीतदेहस्य संयोगान्मम हृदयं कथं दह्यते? यस्माच्च दह्यते, तस्माद् भवां-
-स्तापवान्। यस्माच्च तापवांस्तस्मादियं प्रतिज्ञा सत्यैव ॥७८॥

---

1. B1. लोके अपचार्यते. 2. D. भवन्त्विति.

अनुममार न मार! कथं नु सा रतिरतिप्रथितापि पतिव्रता ।
इयदनाथवधूवधपातकी दयितयापि तथासि किमुज्झितः ॥७९॥

हे मार! सा रतिस्तव भार्या नितान्तप्रसिद्धाऽपि साध्वी नु भोः कथं नानुममार, कथं न भवन्तमनुमृता, वद त्वं तया भार्ययाऽपि संत्यक्तः। भार्या किल सती सर्वा--वस्थासु पतिचरणशरणा। यतः कीदृशः? इयदपरिमितमनाथवधूनां वियोगिस्त्रीणां वधस्य पातकं विद्यते यस्य स तथा ॥७९॥

सुगत एव विजित्य जितेन्द्रियस्त्वदुरुकीर्तितनुं यदनाशयत् ।
तव तनूमवशिष्टवतीं ततः समिति भूतमयीमहरद्धरः ॥८०॥

हे स्मर! यस्मात् कारणाद् हि जितेन्द्रियत्वाद् विशेषेण जित्वा सुगतो बुद्ध एव, तवोरुर्महती या कीर्तिः, सैव तनुर्मूर्तिस्तामनाशयददर्शनमनयत्। ततो हेतोर्भगवान् हरः समिति रणे भवतो मूर्तिमवशिष्टवतीमुद्धृतां भूतमयीं पञ्चभूतात्मिकामहरद्-भस्मसाच्चकार। द्वे हि पुरुषस्य शरीरे यशोमयं पाञ्चभौतिकं च कामस्य कीर्तिः प्रायो विषयेभ्यः, ते चेन्द्रियाणि हरन्ति। इन्द्रियाणि च मनो हरन्ति। मनश्चात्मानं हरति। आत्माऽधिष्ठितं हि मन इन्द्रियाण्यधितिष्ठति। [102.a] मनोऽधिष्ठितानि चेन्द्रियाणि विषयेषु प्रवर्तन्ते, कामश्च जित्वा तानि तत्र संसञ्जयति। तानि च यदि तत्र संसक्तानि तर्हि प्राणी कामेन जित एव। स चेज्जितस्तर्हि कामस्य कीर्तिर्जातैव। एतच्च संविधानकमाब्रह्म व्यवहरति। केवलमत्र भगवान् बुद्धावतारो विष्णुस्ततो बहिर्भूतः। अतोऽनेन कामस्य कीर्तिर्नाशिता युक्त्याऽनेन कामस्य जितत्वात्। सुगतो हि जितेन्द्रियस्तथा हरोऽपि। यथा हि तेन कामो जितस्तथाऽनेनापि। तेन चेत् तस्य तनूर्नाशिता। तर्ह्यनेनापि नाशयितुं योग्या। अत एकेन तावदेका तनूर्नाशिता द्वितीयेन द्वितीयेति ॥८०॥

फलमलभ्यत यत्कुसुमैस्त्वया विषमनेत्रमनङ्ग! विगृह्णता ।
अहह! नीतिरवाप्तभया ततो न कुसुमैरपि विग्रहमिच्छति ॥८१॥

हे अनङ्ग! यत् कारणात् त्वया कुसुमैरपि पुष्पैरपि विषमनेत्रं त्रिनयनं विगृह्णता विरुन्धयता सता विग्रहस्य फलं साध्यमप्रयुज्यमाजमनङ्गत्वलक्षणमेव वाऽलभ्यत[1], तदर्थं, तत एव दृष्टान्तादवाप्तभया चकिता सती नीतिः कामन्दक्यादिशास्त्रपद्धतिः कुसुमैरपि विग्रहं विरोधं न मन्यते। किं पुनर्लोहैरस्त्रशस्त्रैः।

1. ख. वाऽलभ्येति.

तत्र इत्युक्तम्-"पुष्पैरपि न योद्धव्यं, किं पुनर्निशितैः शरैः" इत्यादि। अत्रोक्ति--प्रत्युक्तौ कुसुमैरिति पौनरुक्त्यं गुण एव। अनङ्गादीनि पदान्यत्र साभिप्रायाणि। नीतिमन्तः पुरुषा नीतिः ॥८१॥

अपि धयन्नितरामरवत्सुधां त्रिणयनात्कथमाप्निथ तां दशाम्।

भण रतेरधरस्य रसादरादमृतमाप्तघृणः खलु नापिबः ॥८२॥

हे स्मर! अपरे सुरा इवामृतं पिबन्नपि त्रिणयनात् तां भस्मरूपतां दशामवस्थां कथं त्वं प्राप्तः। यथा[1] ह्यपरे सुरा अमृतं पिबन्तोऽमराः सन्ति, तथा त्वयाऽप्यमरेण भाव्यम्। तेषामिव तवाप्यमृतत्वात्[2]। न चामरो म्रियते, त्वं च मृतस्तत्र, किं कारणं भण, कथय। त्वममृतं नापिबः, न पीतवानसि। कीदृशः? प्राप्तघृणः, प्राप्तजुगुप्सः। अर्थादमृततः[3]। कस्मात्? रतेर्निजजायाया अधरस्य यो रसो मृष्टतालक्षणस्तस्यादरादत्ति--स्वीकाराद् बहुमानादित्यर्थः। तव हि रतिरदनच्छदरसे सुधातोऽप्यधिक आदर--स्तत स्त्वया सा नैव पीता ॥८२॥

भुवनमोहनजेन किमेनसा तव परेत! बभूव पिशाचता।

यदधुना विरहाधिमलीमसामभिभवन् भ्रमसि स्मर! मद्विधाम् ॥८३॥

रे परेत! मृत त्रिजगद्वैचित्र्यकरणभवेन पापेन तव किं पिशाचता स्मशानवासि--व्यन्तरदेवयोनिता जाता। यस्मात् कारणात् त्वं मत् सदृशीं वियोगमनोव्यथामलिना--मभिभव-[102·6]-न्नधितिष्ठन् भ्रमसि घूर्णसे[4]। पिशाचो हि दुष्टोच्छिष्टस्थानसंचरणा--दिदूषितां भीरुनारीमधिष्ठाय शिरोधूननपुरःसरमुद्भ्राम्यति। पापिनश्च मृतस्यौर्ध्वदैहिक--संस्काराणामकृतत्वात् पिशाचता भवत्येव ॥८३॥

बत ददासि न मृत्युमपि स्मर! स्खलति ते कृपया न धनुः करात्।

अथ मृतोऽसि मृतेन च मुच्यते न किल मुष्टिरुरीकृतबन्धनः ॥८४॥

हे स्मर! मम यो मृत्युर्युज्यते तं ददासि न, नकारः काक्वा विध्यर्थः। अपि तु यो मम मृत्युर्युज्यते तं देहि, अथ मामबलामेवं बाधमानस्य तव हस्ताद् दयावशात् चापोऽपि न च्यवते। अथवा त्वं मृतोऽसि। मृतेन च पुंसोररीकृतबन्धनो[5]ऽङ्गीकृतसंयमनो मुष्टिर्न मुच्यते, नोद्बाध्यते, नैव शिथिलीक्रियत इति प्रसिद्धम्। अतो मुष्टेर्दृढबन्धत्वाद्[6] हस्तात् कथं धनुर्ध्वसताम्। "बत ददासि" इति मूलपाठः। ददासीत्यस्य सम्प्रदानं गम्यम् ॥८४॥

---

1. B1. तथा. 2. 8. अमृतपत्वात्. 3. B1. अमृतो. 4. 8. घूर्णसे. 5. 8 उरी-. 6. B1. om. -त्वा-.

दृगुपहत्यपमृत्युविरूपताः शमयतेऽपरनिर्जरसेविता ।
अतिशयान्ध्यवपुःक्षतिपाण्डुताः स्मर! भवन्ति भवन्तमुपासितुः ॥८५॥

हे स्मर! अपरस्य निर्जरस्य देवस्य सेविता शुश्रूषिता भवितव्यो, दृशोरुपहतिश्चक्षु-रुपद्रवोऽपमृत्युर्ज्वरादिकृतमकालमरणं प्रमादजं वा, विरूपता कुष्ठादिकृता देहविकृति-स्ताः शमयते नाशयति। भवन्तं च सेविनः पुरुषस्यातिशयेनान्धत्वं, शरीरस्य च क्षयः पाण्डुत्वं चैतानि भवन्ति। एतच्च प्रसिद्धमेव ॥८५॥

स्मर! नृशंसतमस्त्वमतो विधिः सुमनसः कृतवान् भवदायुधम् ।
यदि धनुर्दृढमाशुगमायसं तव सृजेत्प्रलयं त्रिजगत् व्रजेत् ॥८६॥

हे स्मर! त्वं नृशंसतमो भृशं घातको[1]ऽतो हेतोर्विधिः स्रष्टा भवत आयुधं इति सुमनसः पुष्पं (पुष्पाणि) विहितवान्। ननु यथेदं नायं कुर्यात्, ततः किं स्यादि-त्याह। यदि स तव दृढवंशादिमयं धनुः कुर्यादायसं लोहं चाशुगं बाणं कुर्यात् तदा त्रिभुवनं क्षयं यायात्। [2]कुसुमायुधसद्भावेनापि त्वया विश्वस्यैवं बाध्यमानत्वात् ॥८६॥

स्मररिपोरिव रोपशिखी पुरः दहतु ते जगतामपि मा त्रयम् ।
इति विधिस्त्वदिषून् कुसुमानि किं मधुभिरन्तरसिञ्चदनिर्वृतः ॥८७॥

हे स्मर! विधिः स्रष्टा इति विचार्य भवद्बाणरूपाणि पुष्पाण्यन्तर्मध्ये[3] मधुभिः क्षौद्रैस्तत्त्वतस्तु मकरन्दैरसिञ्चत् सिक्तवान्। कीदृशः? अनिर्वृतोऽप्राप्तसुखः। इति कुत इत्याह। तव रोपशिखी शराग्निर्जगतामपि त्रयं जगत्त्रयं मा भस्मीकरोतु। उपमानेन सम्भवं दर्शयति। कस्येव रोपशिखी कार्षीत् त्रयमित्याह। स्मररिपोर्भग-[१०३·ब]-वतो भूतपते रोपशिखी यथा पुरां पुराणां त्रयं दग्धवान्। कुसुमेषु मधुनः सद्भावा[4]दित्थं सम्भावना ॥८७॥

विधिरनंशमभेद्यमवेक्ष्य ते जनमनः खलु लक्ष्यमकल्पयत् ।
अपि स वज्रमदास्यत चेत्तदा त्वदिषुभिर्व्यदलिष्यदसावपि ॥८८॥

हे स्मर! ब्रह्मा यद्भवतो वेध्यं जनानां लोकानां मनश्चित्तं दत्तौ तदनंशत्वादभेद्य-मदलनीयं शकलीकर्तुमशक्यमवेक्ष्य विमृश्य। मनो ह्यणुप्रमाणमणुश्चानंशः। ननु यदि मम [5]लक्ष्यमन्यत्। किमपि स दद्यात्, तदा किं स्यादित्याह। [6]चेद्यदि स विधिस्ते वज्र-मपि लक्ष्यमदास्यत् तदा भवद्बाणैरसौ वज्रोऽपि व्यदलिष्यत् खण्डशो भवेत् ॥८८॥

1. B. om. अतो. 2. B. कुसुममायुध. 3. B1. अन्तरमध्ये. 4. B. सद्भावनात्
5. B. शख्यम्. 6. B1. चेज्यदि.

अपि विधिः कुसुमानि तवाशुगान् स्मर! विधाय न निर्वृत्तिमाप्तवान्।
अदित पञ्च हि ते स नियम्य ताँस्तदपि तैर्बत जर्जरितं जगत् ॥८९॥

हे स्मर! जानामि भवतः पुष्पाण्यपि बाणतां नीत्वा स्रष्टा सुखं न लेभे। कथं ज्ञायत इत्याह। हि यस्मात् स विधिस्ते तव तुभ्यं वा तानाशुगान्नियम्य व्यवस्थाप्य पञ्चैव दत्तवान्। त्वया षष्ठो बाणः कदापि क्वापि न गृहीतव्य इति। बत खेदे। तदप्येवमपि सति तैस्तवाशुगैर्जगत् त्रिभुवनं जर्जरीकृतम्। बहुधा बाधितम्। ब्रह्मादीनामपि तेन विडम्बितत्वात् ॥८९॥

उपहरन्ति न कस्य सुपर्वणः सुमनसः कति पञ्च सुरद्रुमाः।
तव तु हीनतया पृथगेकिकां धिगियताऽपि न तेऽङ्ग! विगर्हणा ॥९०॥

हे स्मर! पञ्चसङ्ख्याकाः सुरतरवः कस्य सुपर्वणो देवस्य कति सङ्ख्याकाः सुमनसः कुसुमानि नोपहरन्ति नोपनयन्ति। काक्वाऽपि तु सर्वेषां देवानां यथेष्टं ढौकयन्ति, तव तु हीनतया क्षुद्रत्वेन पृथक् प्रत्येकमेकिकामेकामेवोपहरन्ति। अय--मपि वराक एकैकेन कुसुमेनानुगृह्यतामिति दयारसास्ते पञ्चापि पञ्चपुष्पाणि तव क्षिपन्ति धिक् कष्टमङ्ग रे! इयताप्यपमानेन ते तव विगर्हणा निन्दा न। अपि त्वस्मिन्नर्थे विचार्यमाणे तव महती निन्दा द्योतते ॥९०॥

कुसुममप्यतिदुर्नयकारि ते किमु वितीर्य धनुर्विधिरग्रहीत्।
किमकृतैष तवैकतदास्पदे द्वयमभूदधुना हि नलभ्रुवौ ॥९१॥

हे स्मर! विधिस्ते तव कुसुममपि धनुर्दत्त्वा किमग्रहीत् प्रतीपमाददे। काक्वाऽपि तु नूनमग्रहीत्। किमित्यग्रहीदित्याह। यतो दुर्नयकारि अनीतिनिष्ठं कुसुमत्वेऽपि दु--र्नयं न त्यजति। अहह! एष विधिरेवं कुर्वन् किमकृत। काक्वाऽपि तु भव्यं न कृतवान्। कुत इत्याह। हि यस्मात् तव तस्यैकस्य कुसुममयधनुष आस्पदे स्था--[103·b]-ने सम्प्रति द्वयमुभयमभूत् सम्पन्नम्। किं द्वयमित्याह। नलभ्रुवौ नलभ्रुवो--स्तस्यास्तद्द्वयकार्यकारणादियमुक्तिः ॥९१॥

षड्तवः कृपया स्वकमेककं कुसुममक्रमनन्दितनन्दनाः।
ददति षड्भवते कुरुते भवान् धनुरिवैकमिषूनिव पञ्च तैः ॥९२॥

हे स्मर! षट्सङ्ख्याका ऋतवो युगपदुल्लासितेन्द्रोद्याना दयया निजमेकैकमेव कुसुमं भवते तुभ्यं ददते प्रयच्छन्ति। तैः षड्भिः कुसुमैः कृत्वा भवानेकं धनुरिव कुरुते,

[1]पञ्चेषूनिव पञ्चबाणानिव कुरुत इत्यत्रेवशब्द उपमेयस्यातितरां हीनतामाह। इत्थं चोक्तिः प्रायो लोके दृश्यते ॥९२॥

यदतनुस्त्वमिदं जगते हितं क्व स मुनिस्तव [2]यः सहते हतीः।
विशिखमाश्रवणं परिपूर्य चेदविचलद्भुजमुज्झितुमीशिषे ॥९३॥

हे स्मर! यत् त्वमतनुरशरीर एतज्जगते विधाय हितमुपकारि ननु यद्यहं सशरीरोऽभविष्यं तदा किमभविष्यदित्याह। अविचलद्भुजं यथा भवत्येवं विशिखं बाणमाश्रवणं कर्णं यावत् परिपूर्य पूर्णं कृत्वा यदि त्वमुज्झितुं [3]मोक्तुमीशिषे प्रभवसि, तदा स मुनिः क्व यस्तव हतीर्भवतो हननानि सहते, अपि तु स यतिरपि नास्ति। तनुं विना ह्येतन्न घटते। अविचलौ तौ भुजौ यत्र तदविचलद्भुजं विशिखमोक्षणम् ॥९३॥

सह तया स्मर! भस्म [4]झगित्यभूः पशुपतिं प्रति यामिषुमग्रहीः।
ध्रुवमभूदधुना वितनोः शरस्तव पिकस्वर एव स पञ्चमः ॥९४॥

हे स्मर! त्वं यामिषुं यं बाणं पशुपतिं प्रति त्रिनेत्रविषयेऽग्रहीः संहितवानसि तयेष्वा सह झगिति स्रा(द्रा)गेव भस्माभूर्भसितं जातः। नन्विदानीं मम पञ्चेषवः सन्ति को दोषः। निश्चितं सम्प्रति वितनोः शरीररहितस्य तव स पञ्चमः पञ्चसङ्ख्यापूरकः शरः पिकस्वरः कोकिलालाप एवाभूत्। अथ च पिकस्वरः पञ्चमनामा। पिकस्वर एव स पञ्चमः शरोऽभूदिति पञ्चमशब्द आवर्तते ॥९४॥

स्मर! स मद्दुरितैरफलीकृतो भगवतोऽपि भवद्दहनश्रमः।
सुरहिताय हुतात्मतनुः पुनर्ननु [5]जनुर्दिवि तत्क्षणमाप्विथ ॥९५॥

हे स्मर! ममापुण्यैः स तादृशो भगवतः शम्भोरपि तव ज्वलने खेदो निरर्थको विहितः। कुत इत्याह। ननु भोस्त्वं त्वरितमेव स्वर्गे भूयो जन्म लब्धवानसि। यतः सुरहिताय शक्रादिदेवोपकाराय हुतात्मतनुर्वह्नौ प्रक्षिप्तदेहः। इन्द्रादिदेवप्रीतये यज्ञेषु ये पशवो हूयन्ते, तेऽपि किल तत्क्षणमेव दिवि देवविशेषत्वेन सम्भवन्ति। त्वं तु देव एव ॥९५॥

विरहिणो विमुख-[104·a]-स्य विधूदये शमनदिक्पवनः स न दक्षिणः।
सुमनसो नमयन्नरनौ धनुस्तव तु बाहुरसौ यदि दक्षिणः ॥९६॥

---

1. B1. पञ्चान्यानिते: 2. D. या. 3. B1. भोक्तु- 4. B1. झटिति, D. धिग- 5. D. तनु.

हे स्मर! विधूदये चन्द्रोद्गमे विमुखस्य पराङ्मुखस्य विरहिणो वियोगिजनस्य शमनदिक्पवनो दक्षिणानिलः स तादृशो न दक्षिणोऽपि तु वामः। चन्द्रो हि पुरस्तादुदेति, तत्र च विमुखो विरही पश्चिममुखो भवति। तथा सति दक्षिणाशासम्भूतो वायुस्तस्य वामो भवति। तर्हि को दक्षिण इत्याह। सुमनसः पुष्पमेव (मयं) धनुश्चापमटनौ कोटौ नमयन् वक्रयन् सन्। तु पुनर्यदि परं तवासौ दक्षिणो वामेतरो बाहुर्भुजो दक्षिणः। दक्षिणो वामेतर एव छलपक्षे। तत्त्वतस्तु दक्षिणः प्रवीणः। अयमभिप्रायः। उदयन्निन्दुर्यदा विरहिजनं दर्शनमात्रादतिमात्रं तापयति, तदा पृष्ठं दत्त्वा पश्चिमा(म)मुखोपविष्टस्य तस्य तस्मात् प्रतीकारः। तथा सति च याम्यानिलस्य दिगवस्थानक्रमाद् दक्षिणत्वं निवृत्तमिन्दूदयसहायाभावात् प्रावीण्यलक्षणं च कामस्य तु चेतसि स्थितत्वात् दृढं प्रहरतो[1] वामेतरबाहोर्दक्षिणत्वं प्रावीण्यं कथमिव प्रतिक्रियतामिति श्लोकस्यार्थः ॥९६॥

किमु भवन्तमुमापतिरेककं मदमुदान्धमयोगिजनान्तकम्।

यदजयत्तत एव न गीयते स भगवान् मदनान्धकमृत्युजित् ॥९७॥

हे स्मर! भगवानुमापतिस्तत एव हेतोर्मदनान्धकमृत्युजित् किमु न गीयते, न वर्ण्यते। मदनश्चान्धकश्च, मृत्युश्च तान् जयति। कथं या मन्ये नामत्रयलब्धौ भगवतः स एव हेतुः। ततः कुत इत्याह। यत् कारणादुमापतिर्भवन्तमेककमेकमेवाजयत्। कीदृशम्? अन्धम्। कया? मुदा। तथा वियोगिजनानामन्तकं मृत्युमेव। एवं च नामत्रयं भवज्जयत एवोपपन्नं भगवतः। तव हि मदनत्वं सामान्यतोऽन्धत्वं मृत्युत्वं च विशेषतः ॥९७॥

त्वमिव कोऽपि परापकृतौ कृती न ददृशे न च मन्मथ! शुश्रुवे।

स्वमदहो दहनाज्ज्वलतात्मना ज्वलयितुं परिरभ्य जगन्ति यः ॥९८॥

हे मन्मथ! त्वमिव भवत्सदृशः परस्यापकृतावपकारकरणे कृती कुशलस्तावत् क्वापि न दृष्टः, श्रुतोऽपि न। यस्त्वं स्वमात्मानमदहः, दहति स्म। किं कर्तुम्? जगन्ति ज्वलयितुं दग्धुम्। किं कृत्वा? परिरभ्याश्लिष्य। केन आत्मना स्वरूपेण। किं कुर्वता? ज्वलता दीप्यमानेन। कस्मात्? दहनाद् वह्नेः दहनकर्मणो वा। त्वं हि युगपज्जनमनःसु वर्तसे। यादृगवस्थस्त्वं तादृगवस्थस्त्वं तादृगवस्थैश्च तैर्भवितुं युक्तमेव। अन्योऽपि कोऽपि यदि कञ्चन तापयितुमिच्छति, तदा किमपि वस्तु सन्ताप्य तेन तं स्पृशति ॥९८॥

1. B1. adds वामेतरतो after प्रहरतो.

त्वमुचितं नयनार्चिषि शम्भुना [१०४.७] भुवनशान्तिकहोमहविः कृतः।
तव वयस्यमपास्य मधुं मधुं हतवता हरिणा बत किं कृतम् ॥९९॥

हे स्मर! भवान् भगवता भवेन योग्यं जगदुपद्रवनिवृत्तिहेतुर्होतव्यद्रव्यं विहितः। क्व? नेत्रज्वलनज्वालासु। बत खेदे। भवन्मित्रं मधुं वसन्तं त्यक्त्वा[1] मधुं दैत्यं हतवता, वधविषयं प्रापितवता हरिणा विष्णुना किं कृतम्। कस्याऽपि तु तेन तं हत्वा विरुद्धं कृतम्। तेनापि भुवनस्य बहुधा बाध्यमानत्वात् तस्यापि मिशावस्यैव युक्ता। द्वे हि होमकर्मणी। शान्तिकं पौष्टिकं च। ग्रहादिबाधोपशान्तये यत् क्रियते, तच्छान्तिकम्। ग्रहादिबाधां विनैव सति यात्रानिमित्ते, निमित्तं विनैव वा यत् क्रियते कल्याण-पुष्टये तत् पौष्टिकम् ॥९९॥

इति कियद् वचसैव भृशं प्रियाधरपिपासु तदाननमाशु तत्।
अजनि पांसुलमप्रियवाग्ज्वलन्मदनशोषणबाणहतेरिव ॥१००॥

इति पूर्वोक्तरीत्या कियद्वचसैव मितभाषणेनैव तत् तादृशं सुकुमारं श्यामाक्षमं तस्या आननं पांसुलं[2] रेणुमदजनि जातम्। लक्षणया शुष्कमित्यर्थः। सार्द्रं हि स्थानं शुष्कं सत्पांसुलं भवति। कीदृशं भृशमत्यर्थम्। प्रियस्याधरमोष्ठं पातुमिच्छु इति युक्तिगम्यो विरहज्वर एव तस्या मुखशोषहेतुः। अन्यस्यापि पिपासोस्तृषितस्य मुखं शुष्यति। अत्र हेत्वन्तरारोपरूपामुत्प्रेक्षामाह। उत्प्रेक्ष्यते[3] – अप्रियाभिरहिताभिर्वाग्भिः पूर्वोक्ताभिर्ज्वलयन् योऽसौ मदनस्तस्य शोषणाख्यो बाणस्तस्य हतेर्घातादिव स एव हि शोषण इत्युच्यते। यः शोषयति। ज्वलता च यस्य बाणस्य संबन्धस्तेनावश्यमुष्णेन भवितव्यमत एव तस्य शोषणत्वमधिकं भवति ॥१००॥

प्रियसखीनिवहेन सहाथ सा व्यरचयद् गिरमर्धसमस्यया।
हृदयमर्मणि मन्मथसायकैः क्षततमा बहुभाषितुमक्षमा ॥१०१॥

अथ सा भैमी प्रियाणां सखीनां निवहेन वर्गेण सहार्धया समस्यया समस(अ)नेन संयोजनेन गिरं वाचं व्यरचयत् गुगुम्फ। यतो हृदयमर्मणि जीवस्थाने कामबाणैरतिक्षता विद्धा। अत एव बह्वधिकं भाषितुं वक्तुमक्षमा न समर्था ॥१०१॥

अकरुणादव सूनशरादसून् सहजयापदि धीरतयात्मनः।
असव एव ममाद्य विरोधिनः कथमरीन् सखि! रक्षितुमात्थ माम् ॥१०२॥

---

1. B1. त्यक्ता, 2. B. पांशुलं 3. B1. उत्प्रेक्षते.

सखी प्राह - हे प्रियसखि ! निर्दयात् पुष्पबाणात् प्रसभं बलादप्यसून् प्राणान् रक्ष। कस्यां सत्याम् । आपदि विपदि । कथं कृत्वा ? आत्मनः स्वस्यैव सहजया नैसर्गिकया धीरतया चेतसः स्थैर्येण। स एव खल्वापदं तरति, यः [105.a] स्वभावत एव धीरो भवति। अथ भैमी प्राह- हे सखि! अद्य मम विरोधिनोऽसवः प्राणा एव। अरीन् रक्षितुं मां कथं ब्रूषे ? शत्रून् केन निमित्तेन रक्षितुं मां प्रेरयसि ? असुसद्भावे हि मया क्लेशोऽनुभूयमानोऽस्ति। अथ च विशेषेण रुन्धन्ति मरणादिति विरोधिनः ॥१०२॥

हितगिरं न शृणोषि किमाश्रवे ! प्रसभमप्यव जीवितमात्मनः।

सखि! हिता यदि मे भवसीदृशी मदरिमिच्छसि या मम जीवितम् ॥१०३॥

सखी प्राह- हे आश्रवे ! वचनकारिणि हितगिरमनुकूलवाचं शृणोषि किं न। काक्वाऽपि तु शृणु। का सा हितगीरिति तां दर्शयति। बलादपि निजं जीवितं रक्ष। भैमी प्राह- हे सखि! ईदृशी मम हिता यदि परं सा त्वं भवसि। या त्वं मे शत्रुं मे जीवितमिच्छसि। उक्तिप्रत्युक्तिरियं स्वप्रधानैव प्रायः ॥१०३॥.

अमृतदीधितिरेष विदर्भजे ! भजसि तापममुष्य किमंशुभिः।

यदि भवन्ति मृताः सखि! चन्द्रिकाः शशभृतः क्व तदा परितप्यते ॥१०४॥.

सखी प्राह- हे प्रियसखि ! एषोऽमृतदीधितिः सुधारश्मिर्वर्तते, अस्यांशुभिस्तापं संज्वरं किं भजसि। अमृतं पीयूषमेव दीधितयो यस्य सः। अथ भैमी छलेनाह। हे सखि! यदि चन्द्रिकाश्चन्द्रदीधितयो मृता विनष्टा भवन्ति, तदा शशभृतः केवलकलङ्का-
-वशेषात्स्मान् क्व परितप्यते ! काक्वाऽपि तु सर्वावस्थासु परितापाभाव एव भवति। न मृता अमृता, जीवन्त्यः। तद् विपर्यायान्मृताः। चन्द्रिकासु विनष्टासु कलङ्कस्तम एवाव-
-शिष्यते, तच्च सर्वदोषहरम्। तथा च -

"आतपः कटुको, रूक्षश्छाया मधुरशीतला।

कषायमधुरा ज्योत्स्ना, सर्वदोषहरं तमः" ॥ [ ] इति ॥१०४॥

व्रज धृतिं त्यज भीतिमहेतुकामयमचण्डमरीचिरुदञ्चति।

ज्वलयति स्फुटमातपमुर्मुरैरनुभवं वचसा सखि! लुम्पसि ॥१०५॥

सखी प्राह - हे प्रियसखि ! धृतिं व्रज, सुखं प्राप्नुहि। अहेतुकां निष्कारणां भीतिं त्यज। यतोऽयमचण्डमरीचिः शीतकर उद्गच्छति। अनेन तृतीयवाक्यार्थोपन्यासेन पूर्व-
-वाक्यार्थद्वयस्य चण्डरोचिर्भ्रान्तिकृता स्वल्पधृतिर्भीतिश्च लभ्यते। भैमी प्राह- हे सखि!

अनुभवं प्रत्यक्षं वचनेन हितोपदेशेन कृत्वा निराकरोषि, यतोऽयमातपमुर्मुरैर्घर्मचूर्णैस्त्व-
-चमसृग्धरां ज्वलयति, दीपयति। एतच्च प्रत्यक्षमेव। त्वं च हिता भूत्वाऽन्यथैव ब्रूषे।
आगमाच्च प्रत्यक्षं बलीयः। अथ वाक्यार्थाद् वाक्यार्थान्तरं गम्यते ॥१०५॥

अयि! शपे हृदयाय तवैव तत् यदि विधोर्न रुचेरसि गोचरः।
रुचिफलं सखि! दृश्यत एव यज्ज्वलयति त्वचमुल्ललयत्यसून् ॥१०६॥

सखी प्राह- हे प्रियसखि! तत् तर्हि तवैव भवत्या एव [105-6] हृदयायापि शपे तथापि त्वदाशयस्य विरुद्धं करोमि द्रोहं चिन्तयामि, यदि त्वं विधोश्चन्द्रस्य रुचेः कान्तेर्विषयो गोचरो नासि। अपि तु सत्यमेव चन्द्रस्य रुचिस्तवाङ्गानि स्पृशन्ती वर्तते। अथ भैमी छलेनाह- हे सखि! रुचेरिच्छायाः फलं साध्यमेतद् दृश्यतेऽनुभूयत[1] एव। यदयं त्वचं दहति प्राणानुल्ललयतीत्युल्लण्ठनभङ्गिरियम्[2] ॥१०६॥

विधुविरोधितिथेरभिधायिनीमयि न किं पुनरिच्छसि कोकिलाम्।
सखि! किमर्थगवेषणया गिरं किरति सेयमनर्थमयीं मयि ॥१०७॥

सखी प्राह- हे सखि! विधोः विरोधिनी या तिथिः कुहूस्तस्या अभिधायिनीं वक्त्रीं कोकिलां पुनस्त्वं किं नेच्छसि? अपि त्वदिच्छा युक्ता। इयं हि विमृश्यमाना तवातीव हिता। भैमी प्राह- हे सखि! अर्थगवेषणयाऽभिधेयचिन्तया किमत्र प्रयोजनं किल्लेयं 'कुहू कुहूः' इति शब्दं करोति। कुहूस्त्वमावास्या। सा च चन्द्रस्य वैरिणीत्याद्यर्थविमर्शस्तिष्ठतु। यतः सेयं कोकिला मयि विषयेऽनर्थमयीं गिरं किरति क्षिपति। अनर्थमर्थाभावः, स प्रस्तुतो यत्र सा तथा। न खल्वियं तत्त्वतोऽमावास्या-
-मावेदयन्ती वर्तते। अथ चानर्थोऽनिष्टवस्तु, तेन निर्वृत्ता ताम्। तस्याः श्रवणे सति विरहदहनस्योद्दीप्यमानत्वात् ॥१०७॥

हृदय एव तवास्ति स वल्लभस्तदपि किं दमयन्ति! विषीदसि[3]।
हृदि परं न बहिः खलु वर्तते सखि! यतस्तत एव विषीदति ॥१०८॥

सखी प्राह- हे भैमि! यतः स तव वल्लभो नलो हृदये वक्षस्येवास्ति वर्तते। त्वरित-
-प्राप्यत्वाद् भाविनि भूतवदुपचारः। तथापि किं विषादं प्राप्नोषि खेदीभवसि। अतीव सन्नि-
-हिते हिते पुनि विषादः कर्तुं न युज्यत एव। भैमी प्राह- हे सखि! तत एव कारणाद् विषादः प्राप्यते, यतः परं केवलं हृदि चित्ते एव वर्तते, न[4] हि प्रत्यक्षतया ॥१०८॥

---

1. B. -भूयतमेव. 2. B1. -तीत्या न. भङ्गि- 3. B1. विषिदसि. 4. B. न बहिः

स्फुटति हारमणौ मदनोष्मणा हृदयमप्यनलङ्कृतमद्य ते ।
सखि ! हतास्मि तदा यदि हृदपि प्रियतमः स मम व्यवधापितः ॥१०९॥

सखी प्राह- हे प्रियसखि ! कामसन्तापेन हारमध्यस्थे मणौ तरलनाम्नि स्फुटति दीर्यमाणे सति, अथ तव हृदयं वक्षोऽप्यनलङ्कृतमभूषितं जातम्। भैमी प्राह- हे सखि ! तदा तर्हि हता विनष्टाऽस्मि, यदि स मम प्रियो हृदपि व्यवधापितो दूरीकृतः। न विधते नलो यत्रेत्यनलमित्यर्थः। विकल्पनयोक्तिरियं प्रथमपक्षेऽनल-ङ्कृतमिति समस्तम्। अत्र पक्षे तु व्यस्तं कृतं विहितम्। कीदृक्? अनलं नलरहितमिति ॥१०९॥

इदमुदीर्य तदैव मुमूर्छ सा मनसि मूर्च्छितमन्मथपा-[106.a]-वका।
क्व सहतामवलम्बलवच्छिदामनुपपत्तिमतीमपि दुःखिता ॥११०॥

एतत् पूर्वोक्तं हतास्मीत्युच्चार्य तत् क्षणमेव सा मूर्छां प्राप। यतः कीदृशी? चित्ते प्रवृद्धकामाग्निः। युक्तोऽयमर्थः। दुःखिता नितान्तपीडिता [1]अवलम्बलवच्छिदां अवष्टम्भ-लेशखण्डनमपि क्व क्षमताम्। कीदृशीं अनुपपत्तिमतीमघटमानामपि हृदयमनलङ्कृत-मित्यस्य योऽर्थस्तया सम्भावितोऽस्ति, स खल्विह न विधते, किन्तु दुःखिता-नामयं स्वभावो यदियमेवं सति, तथा [2]व्यचेष्टत ॥११०॥

अधित कापि मुखे सलिलं सखी प्यधित कापि सरोजदलैः स्तनौ ।
व्यधित कापि हृदि व्यजनानिलं न्यधित कापि बिसं सुतनोस्तनौ ॥१११॥
उपचचार चिरं मृदुशीतलैर्जलजवालमृणालजलादिभिः ।
प्रियसखीनिवहः स तथा क्रमादियमवाप यथा लघु चेतनाम् ॥११२॥

प्रियसखीनां निवहो वर्गः स पूर्वोक्तस्तथा तेन प्रकारेण क्रमात् परिपाट्या तामुपचचार चिकित्सति स्म। यथेयं भैमी लघु दूतं चेतनां संज्ञामवाप। कथमुपचचार। [3]चिरं बहुकालम्। कैः? जलजानि कमलानि वालः शीतद्रव्यविशेषो जटारूपः मृणालं बिसं जलमुदकमादिशब्दाच्चन्दनलेपादि? तैः। किञ्च। कापि सखीमुखे सलिलं दधे। कापि कमलदलैः कुचावस्थगयत्। कापि हृदये तालवृन्तमरुतं चकार। कापि कृशाङ्ग्या अङ्गे मृणालं स्थापयामास ॥१११॥११२॥

अथ कले ! कलय श्वसिति स्फुटं [4]चलति पक्ष्म चले ! परिभावय ।
अधरकम्पनमुन्नय मेनके ! किमपि जल्पति कल्पलते ! शृणु ॥११३॥

---

1. B. om. अवलम्बलवच्छिदां. 2. B. व्यचेष्टित. 3. B. om. चिरं. 4. B. चपल.

रचय चारुमति! स्तनयोर्वृतिं कलय केशिनि! कैश्यमसंयतम्।
अवगृहाण तरङ्गिणि! नेत्रयोर्जलझराविति शुश्रुविरे गिरः ॥११४॥

इति 'गिरः शुश्रुविरे' एवंरूपा वाचः श्रुताः। अर्थाल्लोकैः। इति कथमित्याह। हे कान्ते! स्फुटं कलय निश्चिनु श्वसिति प्राणिति इयमिति शेषः। हे चन्द्रे! परिभावय चिन्तय पक्ष्म नयनरोम चलिति स्फुरति स्पन्दते। हे मेनके! अधरकम्पनमोष्ठस्फुरणमुन्नयाभ्यू-हस्व। हे कल्पलते! शृणु सम्यगाकर्णय। किमपि जल्पति लपति। चारुर्धिर्धत्ते यस्याः सा चारुमती। तस्याः संबोधनम्। हे चारुमति! स्तनयोर्वृतिमावरणं रचय। हे केशिनि! असंयतं मुक्तं कैश्यं केशपाशं कलय बधान। हे तरङ्गिणि! नयनयोरुदकप्रस्रवणे अवगृहाण रुन्धि शुष्यम् ॥११३॥ ११४॥

कलकलः स तदालिजनाननादुदलसद्विपुलस्त्वरितैरितैः।
यमधिगम्य सुतालयमेतवान् धृतदरः स विदर्भपुरन्दरः ॥११५॥

तस्या आलिजनस्याननान्मुखेभ्यः स महान् कोलाहल उल्ललास। कैः? तूर्णभाषितैः। स क इत्याह। यं बुध्वा भीमः सभयः कन्यान्तःपुरमागतः ॥११५॥

कन्याऽन्तःपुरबाधनाय यदधीका-[106.8]-रान्न दोषा नृपम्
द्वौ मन्त्रिप्रवरश्च तुल्यमगदंकारश्च तावूचतुः।
देवाकर्णय सुश्रुतेन चरकस्योक्तेन जानेऽखिलं
स्यादस्या नलदं विना न दलने तापस्य कोऽपि क्षमः ॥११६॥

तौ द्वौ नृपं तुल्यं युगपदूचतुः। वदतः स्म। तौ द्वौ कावित्याह। मन्त्रिप्रवरश्चागदङ्कार-श्च धीसचिवोऽपि वैद्योऽपि। द्वौ चकारौ द्वयोर्गौणमुख्यभावं निरस्यतः। तौ कावित्याह। ययोरधीकारो यदधीकारो ययोर्नियोगस्तस्मात् कुमारीसअदूषणाय न दोषाः बाधनं कन्यात्वदूषणलक्षणो विकारः सन्निपातादिजश्च कः कथमाह तत्र प्रत्येकं दर्श्यते। अमात्योत्तमस्तावदेवमाह। यथा-हे देव शृणु। सुश्रुतेन सम्यगाकर्णितेन चरकस्य हेरकस्यो-क्तेन वचनेनाहं समस्तं वेद्मि। किं जानासीत्याह। यदस्यां भैम्यां नलदं विना वैरसेनि-मेलकं विहाय, तापस्य दलने, संज्वरस्य नाशने, कोऽपि कश्चिदन्यः पुमान् क्षमो न स्यात्, अपि तु यः कश्चन नलनामानं राजानमानीयास्यै प्रयच्छति, सोऽस्यास्तापमप-नयति। वैद्योऽप्याह। यथा - हे राजन् शृणु - सुश्रुतेन ग्रन्थविशेषेण चरकस्य मुनेरुक्तेन भाषितेन चरकाख्यचिकित्साशास्त्रेणाहं कृत्स्नं वेद्मि। यदस्यां कुमार्यां नलदं जलतृणविशेष-

-मूलमुशीरस्थं विना तापस्य दाहस्य दलने खण्डने कोऽपि ब्रह्माऽपि क्षमो न स्यात् । यदि साक्षाद् ब्रह्माऽप्युत्थायागच्छति, तथाऽप्येतमुपचारं वर्जयित्वा तापमेतमस्याः शमयितुं शक्तो न स्यादिति द्वयोर्निजकर्मकौशलं कथितम् ॥११६॥

ताभ्यामभूद्युगपदप्यभिधीयमानं भेदद्वयाकृति मिथः प्रतिघातमेव ।
श्रोत्रे तु तस्य पपतुर्नृपतेर्न किञ्चिद् भैम्यामनिष्टशतशङ्कितयाकुलस्य ॥११७॥

ताभ्यां मन्त्रिवैद्याभ्यां युगपदेककालमेवाभिधीयमानमुच्यमानं पूर्वोक्तं मिथःप्रति-घातं परस्परप्रतिबाधमेवाभूत् । मन्त्रिणो वचनेन वैद्यवचनं प्रतिहतं, वैद्यवचनेन मन्त्रिवचनमिति । यतः कीदृशम् ? भेदयोर्विशेषयोर्द्वयमुभयं, तस्याकृतिरकरणं विधते यत्र तत् तथा । द्वौ भेदौ न करोत्येकरूपत्वात् । तु पुनस्तस्य भूपतेर्भीमस्य श्रोत्रे कर्णौ किञ्चिन्न पपतुः शुश्रुवतुः । यतः कीदृशस्य ? आकुलस्य व्यग्रस्य । कया ? अनिष्टानां दुःखहेतूनां शतान्याशङ्कत इत्येवंशीलस्तस्य भावस्तत्ता, तया । कस्याम् ? भैम्याम् । अन्य-मनस्कत्वात् तेन तयोर्वचनं न श्रुतम् । न च विवेचितमित्यर्थः । अन्यावपि द्वौ समानौ तर्कौ परस्परं प्रतिहत्य विनश्येते, न तु प्रकृतसाध्यसिद्धिं कुरुतः । तत्स्वरूपं च तर्कशास्त्रे । भेदद्वयाकृतिपाठे भेदैक्यरूपम् ॥११७॥

द्रुतविगमितविप्रयोग-[107.a]-चिह्नामपि तनयां नृपतिः पदप्रणम्राम् ।
अकलयदसमाशुगाधिमग्नां[1] झटिति पराशयवेदिनो हि विज्ञाः ॥११८॥

झटिति अपनीतविरहलिङ्गमपि पुत्रीं पदयोः प्रणम्रां पतितां सतीं राजा पञ्चशर-मनोव्यथा विधुरामतर्कयत् । युक्तोऽयमर्थः । यतः कुशलाः शीघ्रमेव परेषामाशय-मभिप्रायं विन्दन्ति ॥११८॥

व्यतरदथ पिताशिषं सुतायै नतशिरसे सहसोन्नमय्य मौलिम् ।
दयितमभिमतं स्वयंवरे त्वं गुणमयमाप्नुहि वासरैः कियद्भिः ॥११९॥

अनन्तरं तातस्तनूजन्मने आशिषं शुभाशंसनरूपां वाचं ददौ । कीदृश्यै ? नतशिरसे । भक्तिलज्जाभरान्नम्रमूर्ध्ने । किं कृत्वैवं चकार तदाह । द्रुतं सशिरोभूषं शिर उन्नमय्य[2] उत्क्षिप्य । कथमाशिषं ददौ तदाह - हे वत्से ! त्वं कतिपयैर्दिनैः स्वयंवरस्थानगत-मभीष्टं गुणवन्तं पतिं लभस्वेति ॥११९॥

1. B1. आयुधा- . 2. D. om. उन्नमय्य.

तदनु स तनुजासखीरवादीत्तुहिनऋतौ गत एव हीदृशानाम।
कुसुममपि शरायते शरीरे तदुचितमाचरतोपचारमस्याम् ॥१२०॥

ततः पश्चात् स राजा पुत्रीवयस्याः शास्ति स्म। किमित्याह। हे सौम्या। हि यस्मात् तुहिन-
-ऋतौ गत एव वसन्ते प्रविष्टमात्रे ईदृशानां प्राप्तवयस्कानां देहे पुष्पमपि बाणवदाचरति।
तस्मात् कारणाद् यूयं सर्वा अस्यां निजसख्यामुचितं योग्यमुपचारं चिकित्सितमाचरत
कुरुध्वम्। तुहिनऋतावित्ति नात्र सन्धेर्विवक्षा ॥१२०॥

कतिपयदिवसैर्वयस्यया वः स्वयमभिलष्य वरिष्यते वरीयान्।
कृशिमशमनयानया तदाप्तुं रुचिरुचिताथ भवद्विधाभिधाभिः ॥१२१॥

हे साध्व्यः! कियद्दिनैर्वो युष्माकं वयस्यया सख्या स्वयमात्मना अभिलष्य कामयित्वा
वरीयान् वरो वरिष्यते। तत्कारणादनया भवत्सख्या कृशिमशमनया कृशभावाभावेन कृत्वा भवद्
विधानां युष्मत्सदृशीनामभिधाभिस्समुचितैर्वचनैः कृत्वा रुचिः कान्तिराप्तुं लब्धुमुचिता युक्ता।
अथेति मङ्गले। कृशिम्नः शमनायां सखीवाचः कारणम् ॥१२१॥

एवं यद्वदता नृपेण तनया नापृच्छि लज्जास्पदं, यन्मोहः स्मरभूरकल्पि वपुषः पाण्डुत्वतापादिभिः।
यच्चाशीः कपटाद्यदि सदृशी स्याच्चत्र या सान्त्वना, तन्मत्वालिजनो मनोऽधिमतनोदानन्दमन्दाक्षयोः ॥१२२॥
आलिजनो भैम्या वयस्यावर्गस्तत्सर्वं मत्वा ज्ञात्वा मनः स्वान्तं कर्मतापन्नमानन्दमन्दाक्षयोः प्रमोदलज्जयो-
-रब्धिं समुद्रमतनोच्चकार। तत्किमित्याह। एवं पूर्वोक्तं वदता राज्ञा यत्पुत्री त्रपास्थानं न पृष्टा। यच्च
मोहश्चित्तविभ्रमः स्मरभूः कामजनितोऽकल्पि सम्भावितः। यच्च कपटाद् व्याजात् सदृशी तत्कालोचिता
सान्त्वना [107.b] स्यात्समोपचारपद्धतिर्भवेदिति शुभम् ॥१२२॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तुर्यः स्थैर्यविचारणाप्रकरणभ्रातर्ययं तन्महा-
-काव्येऽत्र व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥१२३॥

चतुर्णां पूरणस्तुर्यः। स्थैर्यविचारणाख्यं प्रकरणं ग्रन्थविशेषस्तस्य भ्रातर्येककर्तृत्वात् ॥१२३॥

शाण्डिल्यनाममुनिवंशकरीरकस्य, श्रीधीरधीरत्तनयस्य गदाधरस्य।
कृप्तौ सुधामधुनि नैषधटीकिकायां, सर्गश्चतुर्थ इति सम्प्रति पूर्यते स्म ॥१॥४॥

इति भैमीविरहवर्णनं नाम चतुर्थः सर्गः।[1] शुभं भवतु लेखकपाठकयोः।[2] श्रीरस्तुः। शुभं भवतु। ॐ क्षौं।[3] समाप्तः ॥४॥

---

1. B1. om. शुभं ---- पाठकयोः। 2. B. om. श्रीरस्तु ---- क्षौं। 3. B1. om. समाप्तः